[1] T places this word before भत्तुणो. [2] R om. this word.
[3] iv, 66. [4] iv, 6. [5] iv, 7. [6] ii, 3. [7] iv, 68. [8] iv, 66.
[9] iv, 6. [10] iv, 7. [11] iii, 2. [12] iv, 69. [13] iv, 10.

हे पिअरो। हे पिअर। अत्र यथादर्शनं सर्वेषामप्युकारप्राप्त्यर्थादुवृतां स्वस्याममीत्यच[1] ऋतामिति वचनात् असश्चसङ्ङसिङसटाभिस्भ्यस्सुप्सु[2]। पिउणो। पिउणा। पिउहिं। पिउसुं। इत्यादि तत्शब्दवद्रूपं द्रष्टव्यम्॥

इत्यजन्ताः पुल्लिङ्गाः परिसमाप्ताः[3]॥

Fifth Section.

अथाजन्ताः स्त्रीलिङ्गा उच्यन्ते॥

प्रश्न इति स्थिते।

Hē. ii, 75. **अष्णस्नहूह्लृक्ष्णां णहः॥ १॥**

अ ष्ण स्न ह ह्ल क्ष्ण इत्येतेषां णहादेशो भवति।

Hē. i, 35. **स्त्रियामिमाञ्जलिंगाः॥ २॥**

इमाना अञ्जन्ताद्यश्च शब्दाः स्त्रीलिङ्गे वा प्रयोक्तव्याः। इति स्त्रीलिङ्गतायां टाए[4]। बहुलाधिकारादेकपदेऽपि[5] नित्यं सवर्णदीर्घः[6]। सोर्लुक्[7]। पण्हा। असश्चसोः।

Hē. iii, 27. **शेषू[8] स्त्रियां तु॥ ३॥**

स्त्रीलिङ्गात्परौ असश्चसौ शिदोत्त्वमुत्त्वं च स्यादेते[9]। शित्त्वमिकारोकारान्तार्थम्[10]। पण्हाओ। पण्हाउ। पत्ते सुक्[11]। पण्हा। संबुद्धौ।

Hē. iii, 41. **टापो डे॥ ४॥**

टाबन्तात्परस्याः संबुद्धेर्डित्त्वं[12] तु[13] भवति। हे पण्हे। पत्ते सोर्लुक्[14]। हे पण्हा। अमि। अम इति[15] मकारो बिन्दुर्भवतीति[16] बिन्दुश्च[17]।

Hē. iii, 36. **स्वरस्य बिन्दमि॥ ५॥**

बिन्दौ अमि च परे स्वरस्य ह्रस्वो भवति। अम इति[18] मकारादेशस्य बिन्दुर्भवतीति[19] बिन्दुभावादम उपादानं बिन्दाविवेव सिद्धे[20] बाहुलकात्प्रयुक्तं ह्रस्वस्य क्वचित्किमपि पाधिक्यमम परे न क्वचिदपि मा भूदिति। पण्हं। तृतीयाषष्ठीसप्तमीचतुर्थ्येकवचनेषु[21]।

---

[1] iv, 67. [2] R om. भ्यस्. [3] T om. this word. [4] Pā. iv, 1, 4. [5] iii, 1 and 2. [6] Pā. vi, 1, 101. [7] iv, 6. [8] शोशू Tri. [9] T om. तु; ii, 3. [10] ii, 5. [11] iv, 9. [12] iv, 7. [13] ii, 3. [14] iv, 6. [15] iv, 11. [16] iii, 10. [17] R om. च. [18] iv, 11. [19] iii, 10. [20] R adds अमोऽप्युपादानं. [21] °षष्ठ्येक° R.

टाङिङसाम् ॥ ६ ॥ Hē. iii, 29.

स्त्रीलिङ्गात्परेषां टा ङि ङस् इत्येतेषां स्थाने शित[1] अ आ इ ए इत्यादेशा भवन्ति। इति चतुर्ष्वपि प्राप्तेषु।

नातश्शा ॥ ७ ॥ Hē. iii, 30.

स्त्रीलिङ्गादाकारान्तात्परेषां ङसिटाङिङसां शात्वं न भवति। पण्हाअ। पण्हाइ। पण्हाए। ङसौ। स्त्रियामिति वर्तमाने।

ङसेश्शशाशिशे ॥ ८ ॥ Hē. iii, 29.

स्त्रीलिङ्गात्परस्य ङसेः शितश्चत्वारः[1] अ आ इ ए इत्यादेशासु[2] भवन्ति। नातश्शेति[3] शादेशस्य प्रतिषेधः। पण्हाअ। पण्हाइ। पण्हाए। पण्हाहिंतो। इत्यादि। अनुक्तमन्यशब्दानुशासनवदिति[4] प्राप्तो[5] याट्[6] बाङ्लकान्न भवति। एवमन्यत्रापि प्राप्तस्य निवर्तनीयस्य निवर्तकालाभावे इदमेव निवर्तकं वेदितव्यम्॥

सर्वाशब्दस्य भेदः। चतुर्थीबहुवचने ङेसो ङमित्यामि[7] अकारान्तत्वाभावेऽप्यामां ङेसिमिति[8] बहुवचनाङ्डेसिंआदेशे। सव्वेसिं। पक्षे। सव्वाणं। सव्वाण। सव्वासं इति तु सिद्धावस्थायां स्वरस्य बिन्दुमीति[9] ह्रस्वः। शेषं पण्हाशब्दवत्। एवं एक्कावहुमाशब्दौ। पुहुमादि पण्हाशब्दवत्॥

कचिशब्दस्य भेदः। प्रायो लुगिति[10] चकारस्य लुक्। सुगनपि सोरिति[11] सोर्लुक्। जस्शसोः[12]। शोशू स्त्रियां लिति[13] शोआदेशौ। पक्षे सुक्[14]। उभयत्रापि शित्त्वाद्दीर्घः[15]। कईओ। कईउ। कई[16]। संबुद्धौ। डोसुकाविति[17] सुकि। हे कई। पक्षे[18] सोर्लुकि[19]। हे कइ। टादौ शशाशिशे इति चत्वारोऽपि[20]। कईअ। इत्यादि। भिस्भ्यस्सुप्सु।

---

[1] ii, 5. [2] ii, 3. [3] v, 7. [4] ii, 2. [5] T om. this word. [6] Pā. vii, 3, 113. [7] iv, 17. [8] iv, 34. [9] v, 5. [10] iv, 26. [11] iv, 49. [12] R om. इति सोर्लुक्। जस्शसोः. [13] v, 3. [14] iv, 9. [15] ii, 5. [16] R om. this word. [17] iv, 10. [18] R om. this word. [19] सोर्लुक T; iv, 6. [20] v, 6.

THE RAMAKRISHNA MISSION INSTITUTE OF CULTURE LIBRARY 37,512

इदुतोर्दिः[1]। दईहिं। इत्यादि। ङसि। दिदीत्तोदुङसौ[2]। दईहिंतो। इत्यादि। द्विचिश्शब्दौ पुष्पिङ्गवत। तिस्रादेश्शस्यापि[3] स्थानिवद्भावेन[4] तिस्रितीआदेशौ[5]॥

ईकारान्तो लक्ष्मीशब्दः। सृहादाविति[6] छः। शेषादेश्शस्येति[7] द्वित्वम्। सौ जस्शसोश्च।

Hē. iii, 28. **आदीतस्सोश्च॥ ९॥**

स्त्रियामीकारान्तात्परस्य सोश्चकाराज्जस्शसोश्च आत्त्वं तु[8] भवति। लो ऊ इति[9] ऊत्वम्। ऊच्छीआ[10]। पञ्चे सोर्लुक्[11]। ऊच्छी। ऊच्छीआ। शेषादेश्शयोः[12]। ऊच्छीओ। ऊच्छीउ। संबुद्धौ।

Hē. iii, 42. **ह्रस्वलीदूतः॥ १०॥**

संबुद्धावीदूतोर्लानुबन्धो[13] ह्रस्वो भवति। सोर्लुक्[14]। हे ऊच्छि। विषयभेदे सत्यपि आदीतस्सोस्येत्येतस्मिन्प्रवृत्ते[15] संनिपातलक्षणो विधिरनिमित्तं तद्विघातस्येति[16] ह्रस्वस्य बाधप्रसङ्गाद्विरोधे सति विशेषेण विहितत्वेन[17] प्रथमं ह्रस्वो भवति। पश्चादादीतस्सोस्येत्येतत्प्राप्त्यभावान्न[18] प्रवर्तत इति केचिदाहुः। अन्ये तु आदीतस्सोस्येत्यस्य वैकल्पिकत्वेन तदभावे ह्रस्वविधानस्य चरितार्थत्वादादीत इत्येतदेव प्रथमं प्रवर्तते। तच्च संनिपातलक्षणह्रस्वाभावे हे ऊच्छीआ इति रूपमित्याहुः। अमि। स्वरस्य बिन्दुमीति[19] ह्रस्वः। ऊच्छिं। शेषं रुचिशब्दवत॥

श्रीशब्दस्य भेदः।

Hē. ii, 104, 105. **हर्षामर्षश्रीह्रीक्रियापरामर्शकृत्स्नदिष्ट्यार्हे॥ ११॥**

हर्षादिषु हे इत्यत्र च संयुक्तस्यान्त्यहलः प्रागित्त्वं भवति। शेषस्सिलोपः[20] सत्। सिरी॥

---

[1] iv, 53. [2] iv, 22. [3] Pā. vii, 2, 99. [4] Pā. i, 1, 56. [5] iv, 58 and 59. [6] iv, 2. [7] iv, 4. [8] ii, 3. [9] iv, 63. [10] T om. this word. [11] iv, 6. [12] v, 3. [13] ii, 4. [14] iv, 6. [15] v, 9. [16] *Paribhāshēnduśēkhara*, 85. [17] विशेषविहित° R. [18] °स्येतत्प्राप्त्यभावान्न R, °स्येतत्प्रवृत्त्यभावान्न T. [19] v, 5. [20] iv, 29.

उकारान्तस्तनुशब्दः। न इति[1] णत्वम्। तणू। रुचिशब्दवत्। वोतो गुणवचनादिति[2] ङीषि।

तन्व्याभे ॥ १२ ॥ Hē. ii, 113.

तन्व्याभा वोतो गुणवचनादिति[2] ङीषन्तास्वेषु तन्व्याभेषु संयुक्तस्याद्यहलः प्रागुत्वं भवति। तणुवीआ। लच्छीशब्दवत्॥

भूशब्दस्य भेदः। स्वार्थे तु कश्चेति वर्तमाने।

डुमञ्जडमञ्जौल्[3] भुवः ॥ १३ ॥ Hē. ii, 167.

भूशब्दात्स्वार्थे उमञ्च अमञ्च इत्येतौ डितौ[4] भवतः। खित्त्वान्नित्यम्[5]। भुमआ। भमआ॥

ऋकारान्तः स्वसृशब्दः। ङीपः प्राप्तौ[6]।

स्वसृगाङ्डाल् ॥ १४ ॥ Hē. iii, 35.

स्वस्रादेर्डिस्[7] लिश्च[8] आप्रत्ययो भवति। सस्सा। सस्साओ। सस्साउ। एवं णणंदा। दुहिआ॥

मातृशब्दस्य भेदः।

मातुराऱ्ऱा[9] ॥ १५ ॥ Hē. iii, 46.

मातृशब्दस्य सुपि परे आ अरा[9] इत्येतौ भवतः। तत्र वञ्चनाधिक्षेपार्थस्य आ देवतार्थस्य अरा[9] इति नियमः। माआ। माआओ। इत्यादि। माअरा[9]। माअराओ[9]। तृतीयैकवचने चतुर्थैकवचने च उदृतां स्वरामभीत्युत्वे[10]। माऊए। माऊअ। माऊआ। माऊइ[11]। चतुर्थीबहुवचने। तत एवागीणस्यापि।

---

[1] iv, 47. [2] Pā. iv, 1, 44. [3] ङुमय° Tri.[1] and Tri.[2a], डुमय° Tri.[3]; °डमयौ Tri.[1] and Tri.[2a], °डमओल् Tri.[2b] and Tri.[3], °डमाओ R and T. [4] iv, 7. [5] ii, 4. [6] In Tri. the four rules preceding Si. v, 14 treat of the feminine affix ङीप्. [7] iv, 7. [8] ii, 4. [9] अरा Tri., आरा R and T. [10] iv, 67. [11] R om. the three last words and inserts माऊणं। माऊण.

Hē. i, 135. **इदुन्मातुः**[1] ॥ १६ ॥

इतोत्त्वम्। माईणं। माईण॥

ओकारान्तो[2] नौशब्दः।

Hē. i, 148, 159. **ऐच एऽ॥ १७ ॥**

ऐकारौकारयोरेकारौकारौ यथासंख्यं भवतः। इत्येऽऽदेशे प्राप्ते।

Hē. i, 164. **नाव्यावः ॥ १८ ॥**

नौशब्दे ऐच आव इति भवति।

Hē. i, 229. **आदेस्तु ॥ १९ ॥**

शब्दानामादेर्नकारस्य णस्तु[3] भवति। णावा। णावा॥

इति स्त्रीलिङ्गाः परिसमाप्ताः॥

SIXTH SECTION.

अथ नपुंसकलिङ्गा उच्यन्ते॥

अकारान्तो गुणशब्दः।

Hē. i, 34. **क्लीबे गुणगाः ॥ १ ॥**

गुणादयो नपुंसके वा प्रयोक्तव्याः। इति नपुंसकलिङ्गतायाम्।

Hē. iii, 25. **मऽल्लुगसंबुड्ढेर्नपः ॥ २ ॥**

नपुंसकात्परस्य सोर्ऊगुवन्धो मकारो लुक् च भवति। असंबुद्धेः। संबुद्धेर्न भवति। ऊकारः सानुनासिकोच्चारं ऊदिदिति[4] सानुनासिकोच्चारार्थः। अकार उच्चारणार्थः। मऽलाधिकाराद्दकारान्ताच्च लुक्[5]। अन्यच्च मऽलुकौ पर्यायेण भवतः। लुग्विधानेन च मऽका बाध्यमानः सोर्लुगिति[6] लुगेव प्रतिप्रसूयते। डोआदेशस्तु[7] मऽका बाध्यते। गुणं। जस्शसोः।

---

[1] R and T om. the first letter इ. [2] ओकारान्तो R and T.
[3] ii, 3. [4] ii, 6. [5] iii, 1. [6] iv, 6. [7] iv, 7.

ङिशिंशिङ् जश्शस्[1] ॥ ३ ॥ Hē. iii, 26.

नपुंसकात्परौ असश्शसौ ङि इं इङ् इति त्रीनादेशानापद्येते। ङिशि-ङोरेकः सबिन्दुकः अपरो ङित्[2]। न इति[3] णत्वम्। गुणाणि। गुणाइं। गुणाईँ। सुरजश्शसोः[4] शसेत्[5] इत्येताविभिरादेशैर्बाधेते। संबुद्धौ। असंबुद्धेरिति[6] निषेधात् मडादेशो न भवति। डोसुकाविति[7] विकल्पे। हे गुणो[8]। पक्षे सोर्लुकि[9]। हे गुण। हे गुणाणि। हे गुणाइं। हे गुणाईँ। शेषं वृक्षशब्दवत्[10]॥

सर्वशब्दस्य भेदः। प्रथमाद्वितीययोर्गुणशब्दवत्। शेषं पुङ्लिङ्गसर्वशब्द-वत्। प्रथमादि गुणशब्दवत्॥

इकारान्तो दधिशब्दः।

खघथधभाम् ॥ ४ ॥ Hē. i, 187.

असंयुक्तानामनादौ वर्तमानानामचः परेषां ख घ थ ध भ इत्येतेषां प्रायो हकारो भवति। मडि[11]। दहिं[12]। लुकि[13]। दहि। असश्शसोः ङिशिंशिङः[14]। दहीणि। दहीइं। दहीईँ। संबुद्धौ। अनपीति निषेधात्[15] सुङ्न भवति। असंबुद्धेरिति निषेधात्[16] मड्न भवति। सोर्लुक्[17]। हे दहि। शेषमग्निशब्दवत्। तृतीयादिष्वेकवचनाद्यादेशवशेनानजादित्वात्[18] वाऽञ्जसकाद्वानडादेशाभावः[19]। द्वित्रिशब्दौ पुङ्लिङ्गवत्। वामणीशब्दो दधिशब्दवत्॥

उकारान्तो बिन्दुशब्दः। क्लीबे गुणगा इति[20] नपुंसकत्वम्[21]।

हलि ङञणनाम् ॥ ५ ॥ Hē. i, 25.

ङ ञ ण न इत्येतेषां हलि परे बिन्दुर्भवति। इति नित्यं बिन्दौ प्राप्ते।

---

[1] असश्शसौ T. [2] ii, 6. [3] iv, 47. [4] iv, 9. [5] iv, 12. [6] vi, 2; असंबुद्धाविति R and T. [7] iv, 10. [8] T adds हे गुणा. [9] iv, 6. [10] वृक्षवत् T. [11] vi, 2. [12] दधिं R. [13] vi, 2. [14] vi, 3. [15] iv, 49. [16] vi, 2. [17] iv, 6. [18] °वचनाद्याद्या° R.—iv, 52. [19] Pā. vii, 1, 75. [20] vi, 1. [21] T om. this sentence.

Hē. i, 30.

वर्गेऽन्त्यः ॥ ६ ॥

बिन्दोर्वर्गे परे प्रत्यासन्नस्यैव वर्गस्यान्त्यस्तु[1] भवति। बिंदुं[2]। बिंदुं[3]। बिन्दुं। बिन्दु[4]। शेषं दधिशब्दवत्। खलपूशब्दो बिन्दुशब्दवत्॥

ऋकारान्तः कर्तृशब्दः। रेफलोपः[5]। द्वित्वम्[6]। सौ। आ सौ वेत्यात्त्वम्[7]। मङ्लुगसंबुद्धेरिति[8] मङ्। स्वरस्य बिन्दुमीति[9] ह्रस्वः। कर्त्तं। लुकि[10] तु। कत्ता। पक्षे आरस्सुपीत्यारादेशे[11]। कत्तारं। जसादिषु। उदृतां त्वस्याममीत्युत्वे[12]। कत्तूणि। कत्तूइं। कत्तूहिं। आरादेशे[13]। कत्ताराणि। कत्तारादं। कत्तारादिं। संबुद्धौ। ड ऋदन्तादित्यत्त्वे[14]। हे कत्त। आ सौ वेत्यात्त्वे[15] सोर्लुगिति[16] लुक्। हे कत्ता। आरादेशे[17] तु डोआदेशे[18]। हे कत्तारो। लुकि[19]। हे कत्तार। उकारादेशे[20] बिन्दुशब्दवत्। आरादेशे[21] गुणशब्दवत्॥

इत्यजन्ताः परिसमाप्ताः॥

Seventh Section.

अथ हलन्ताः प्रदर्श्यन्ते[22]॥

रेफान्तः पुल्लिङ्गश्चतुरशब्दः। जसशसोः।

Hē. iii, 122.

चतुरो जश्शस्भ्यां चउरोचत्तारोचत्तारि॥ १॥

चतुरशब्दस्य जसशसभ्यां सह चउरो चत्तारो चत्तारि इति त्रय आदेशा भवन्ति। चउरो। चत्तारो। चत्तारि। भिसादौ।

Hē. i, 11, 12.

अन्यहलोऽश्रदुदि॥ २॥

शब्देष्वन्यहलो लोपो भवति। अदित्यव्यये उदित्युपसर्गे च न। इति रेफलोपः। इदुतोर्दीरिति[23] नित्यं दीर्घे प्राप्ते।

---

[1] T om. वर्गस्य.—ii, 3. [2] R and T om. this word. [3] बिन्दु R. [4] बिंदु T. [5] iv, 32. [6] iv, 4. [7] iv, 66. [8] vi, 2. [9] v, 5. [10] vi, 2. [11] iv, 65. [12] iv, 67. [13] iv, 65. [14] iv, 68. [15] iv, 66. [16] iv, 6. [17] iv, 65. [18] iv, 10. [19] iv, 6. [20] iv, 67. [21] iv, 65. [22] प्रारभ्यन्ते T. [23] iv, 53.

चतुरो वा ॥ ३ ॥ Hē. iii, 17.

चतुरशब्दस्योदन्तस्य भिस्भ्यस्सुपि परे दीर्घो वा भवति। चउहिं। चऊहिं। चउहिँ। चऊहिँ। चउहि। चऊहि। चउसुंतो। चऊसुंतो[1]। इत्यादि। चऊसुं। चऊसु। चउसुं। चउसु। आमि। यहण्हं संख्याया आमोऽविंशतिगे[2]। इति यह यहं[3] इत्यादेशौ भवतः[4]। चउण्ह। चउण्हं॥

मकारान्तः किंशब्दः। सौ।

चतसि च किमो ल्कः ॥ ४ ॥ Hē. iii, 71.

चतसोशकारात्सुपि च परे किंशब्दस्य लित्को[5] भवति। को। तृतीयैकवचने।

इदमेतत्किंयत्तद्भ्यष्टो डिणा ॥ ५ ॥ Hē. iii, 69.

एभ्यः सर्वादिभ्योऽदन्तेभ्यः परस्य टावचनस्य डिदिणा[6] तु[7] भवति। किणा। चतुर्थ्येकवचने।

किंयत्तद्भ्यो ङसः[8] ॥ ६ ॥ Hē. iii, 63.

किंयत्तद्भ्यः परस्य ङसः शित्सकारो[9] वा[10] भवति। कास। आमि[11]।

किंतद्भ्यां सश् ॥ ७ ॥ Hē. iii, 62.

किंतद्भ्यां परस्यामः शित्सकारो[12] वा भवति। कास। ङसौ।

म्हा ङसेः ॥ ८ ॥ Hē. iii, 66.

किंयत्तद्भ्यः परस्य ङसेः म्हा इति तु[13] भवति। कम्हा।

किमो डीसडिणो ॥ ९ ॥ Hē. iii, 68.

डीसडिणो इत्यविभक्तिको निर्देशः। किमः परस्य ङसेर्डितौ[14] ईस

---

[1] चऊहि। चऊहिं। चउहि। चउहिं। चऊसुंतो। चउसुंतो R.
[2] iv, 57. [3] R om. इति यह यहं. [4] R om. this word.
[5] ii, 4. [6] iv, 7. [7] ii, 3. [8] ङस् Tri. [9] ii, 5.
[10] T om. वा. [11] T om. आमि and the text and commentary of vii, 7. [12] ii, 5. [13] ii, 3. [14] iv, 7.

इणो इति तु[1] भवतः। कीस। किणो। आदेशानामभावपक्षे सर्वशब्दवत्। सप्तम्येकवचने त्वर्थवशेन विशेषः प्रदर्श्यते।

Hē. iii, 65. **ङिरिआडाहेडाला काले ॥ १० ॥**

कालेऽभिधेये किंयत्तद्भ्यः परो ङिः इआ इत्यादेशं ङितौ[2] आहे आला इत्येतौ च[3] वापयते। कइआ। काहे। काळा। पक्षे कत्थ इत्यादि॥

इदंशब्दस्य भेदः। सौ।

Hē. iii, 72. **इदम इमः ॥ ११ ॥**

इदमः सुपि परे इम इत्यादेशो भवति। इति नित्यमिमादेशे प्राप्ते।

Hē. iii, 73. **पुंसि सुना त्वयं स्त्रियामिमिआ ॥ १२ ॥**

इदमः सुना सहितस्य पुंसि अयमिति स्त्रियामिमिआ इति च तु[4] भवति। अअं। इमो। द्वितीयातृतीययोः।

Hē. iii, 77. **टाससि णः ॥ १३ ॥**

टासि तृतीयायामसि द्वितीयायां च परत इदमः स्थाने ण इत्यादेशस्तु[4] भवति। णं। णे। इमं। इमे। णेण। णेहिं। इमेण। इमेहिं। अमि।

Hē. iii, 75, 78. **इहेणं ङ्यमा ॥ १४ ॥**

ङि अम् इत्येताभ्यां सहितस्येदमः स्थाने इह णं इत्येतौ क्रमेण तु[4] भवतः। णं। इदमेतत्किंयत्तद्भ्य इति[5] ङिणादेशः[6]। णिणा। इमिणा। भिसि[7]।

Hē. iii, 74. **अत्तुप्सिंहिस्से[8] ॥ १५ ॥**

इदमः सुपि ङिभिसङसादेशेषु स्सिं हि स्स इत्येतेषु[9] च परतः अत्तं तु भवति। भिसभ्यस्सुपीत्येत्वम्[10]। एहि। चतुर्थ्याम्।

---

[1] ii, 3. [2] iv, 7. [3] T om. च. [4] ii, 3. [5] vii, 5. [6] ङिदिणादेशः R. [7] T om. भिसि. [8] अत्तुस्सिं° Tri., R, and T. [9] इत्यादेशेषु T. [10] iv, 16.

तदिदमेतदां सेसिं तु ङसामा ॥ १६ ॥ Hē. iii, 81.

तद् इदम् एतद् इत्येतेषां स्थाने ङस् आम् इत्येताभ्यां सह यथासंख्यं से सिं इत्यादेशौ भवतः। से। अत्सुप्स्सिंहिस्सि[1] इत्यत्वे। अस्स। सिं। ङौ। इहेणं ज्यमेतोहादेशै[2]। इह। तद्भावे। ङेस्थस्सिंम्मीति[3] चिह्वपि प्राप्नेषु।

न त्थः ॥ १७ ॥ Hē. iii, 76.

इदमः परस्य ङिवचनस्य त्थादेशो न भवति। इमस्सिं। इमम्मि। अत्सुप्स्सिंहिस्सि[4] इत्यत्वे। अस्सिं। सुप्यत्वे। एसुं। एसु। वैकल्पिकादेशाभावे इमादेशः[5]। तच्च सर्वशब्दवत्प्रक्रिया ॥

नकारान्तो राजन्शब्दः। अन्त्यहलोऽप्रदुद्दीति[6] नलोपः। सौ।

राज्ञः ॥ १८ ॥ Hē. iii, 49.

राजन्शब्दस्य नलोपे अन्त्यस्य सौ परे आत्वं वा भवति। प्रायो लुगिति[7] जकारस्य लुक्। सोर्लुक्[8]। राआ। हे राआ। पचे सोर्डो[9]। राओ। हे राओ। हे राअ।

पुंस्याणो राजवच्चानः ॥ १९ ॥ Hē. iii, 56.

पुल्लिङ्गे वर्तमानस्यानित्यस्य[10] स्थाने आण इत्यादेशो वा भवति। पचे राजवत्कार्यं च भवति। इत्याणादेशे। राआणो। आणादेशाभावे राज इत्यकारान्ते च वृषशब्दवत्। तच्च विकल्पवशेन रूपभेदः प्रदर्श्यते। असि।

जश्शस्ङसिङसां णोश् ॥ २० ॥ Hē. iii, 50.

राज्ञः परेषां जस् शस् ङसि ङस् इत्येषां शानुबन्धो[11] णो इत्यादेशो वा भवति।

---

[1] vii, 15. [2] vii, 14. [3] iv, 35. [4] vii, 15.
[5] vii, 11. [6] vii, 2. [7] iv, 26. [8] iv, 6. [9] iv, 7.
[10] *I.e.* अन् इति अस्य. [11] ii, 5.

Hē. iii, 52. **णोणाङिष्विदना जः ॥ २१ ॥**

राजन्शब्दसंबन्धिनोऽना सहितस्य जकारस्य णो णा इत्यादेशयोर्ङि-वचने च परे इकारो वा भवति। राइणो। पक्षे श्नित्वाद्वृद्धौ[1]। राआणो। अमि। 37,819

Hē. iii, 53. **ङेणममामा ॥ २२ ॥**

राजन्शब्दसंबन्धिनोऽना सहितस्य जस्य अम् आम् इत्येताभ्यां सह इणं इत्यादेशो वा भवति। राइणं। शसि णोश्[2]। राइणो। राआणो। तृतीयैकवचने।

Hē. iii, 51. **टो णा ॥ २३ ॥**

राजन्शब्दात्परस्य टावचनस्य णा इत्यादेशो वा भवति[3]।

Hē. iii, 55. **ङस्ङसिटां णोणोर्डेण् ॥ २४ ॥**

ङस्ङसिटावचनानां यो णोणादेशौ तयोः परतो राजन्शब्दसंबन्धिनोऽना सहितस्य जस्य डिदणित्यादेशो[4] वा[5] भवति। रण्णा। पक्षे णोणाङिष्वितीकारः[6]। राइणा। पक्षे। राआणा।

Hē. iii, 54. **भिस्भ्यसांसुप्स्वीत् ॥ २५ ॥**

राजन्शब्दसंबन्धिनोऽना सहितस्य जस्य भिस् भ्यस् आं सुप् इत्येतेषु परेष्वीकारो वा भवति। राईहि। चतुर्थ्याम्। णोङसि ङणि[7]। रण्णो। णोणाङिष्वितीकारे[8]। राइणो। पक्षे। राआणो। भिस्भ्यसांसुप्स्वीदितीकारः[9]। राईसुंतो। इत्यादि। ङौ। णोणाङिष्वितीकारः[10]। राइम्मि। सुपि। भिस्भ्यसांसुप्स्वीदितीकारः[11]। राईसुं॥

आत्मनशब्दस्य भेदः। संयोग इति[12] ह्रस्वः।

---

[1] ii, 5. [2] vii, 20. [3] भवति वा T. [4] iv, 7. [5] T om. वा. [6] vii, 21. [7] vii, 24. [8] vii, 21. [9] vii, 25. [10] vii, 21. [11] vii, 25. [12] iv, 25.

वात्मभस्मनि पः ॥ २६ ॥ Hē. ii, 51.

आत्मभस्मनोः स्तोः[1] पो वा भवति। द्वित्वम्[2]। अप्पन् इति स्थिते। पुंस्त्वाणो राजवच्चान इत्याणादेशः[3]। अप्पाणो। अन्त्यहलोऽप्रादिति[4] नलोपः। राजवन्नावात् राज्ञ इत्यात्त्वम्[5]। अप्पा। आणादेशे। अप्पाणो। अप्प[6] इत्यकारान्ते च वृषशब्दवत्। तत्र विशेषः[7]। राजवन्नावात् टो णा[8] अश्शस्ङसिङसां णोश्रिद्येते[9] प्रवर्तेते। णोणाङिङ्विदनाः[10]। इणममामा[11]। भिस्भ्यसांसुप्स्वोत्[12]। ङस्ङसिटां णोणोर्डेण्[13]। इत्येतानि तु न प्रवर्तन्ते। अनासंबन्धत्वात्[14]। अप्पाणो चिट्ठन्ति। पेच्छ वा। तृतीयैकवचने।

टो वात्मनो णिआणइआ ॥ २७ ॥ Hē. iii, 57.

आत्मनः परस्य टावचनस्य णिआ णइआ इत्यादेशौ वा भवतः। अप्पणिआ। अप्पणइआ। पक्षे टो णा[15]। अप्पणा। ङस्ङस्योर्णोश्चि[16]। अप्पाणो धणं। आगओ वा। पादेशाभावपक्षे[17] मनयामिति[18] मकारलोपः। द्वित्वम्[19]। अत्ता। शेषं पूर्ववत्। अप्पणो अत्तणो इति तु आत्मन इति सिद्धसुपादेशादौ[20]।

अतो डो विसर्गः ॥ २८ ॥ Hē. i, 37.

अकारात्परो विसर्गो डोआदेशमापद्यते। इति डोआदेशे द्रष्टव्यम॥ दकारान्तस्तद्शब्दः। अन्त्यलोपः[21]। सो।

तस्सौ सोऽक्लीबे तदश्च ॥ २९ ॥ Hē. iii, 86.

तदश्चकारादेतदश्च तकारस्य सौ परे सकारो वा भवति। अक्लीबे अनपुंसके। अयं च विकल्पो बाऊलकादेतच्छब्द एव। तच्छब्दे तु नित्यम्।

---

[1] i, 8. [2] iv, 4. [3] vii, 19. [4] vii, 2; R om. ऽअद्. [5] vii, 18. [6] अप्पा R. [7] T om. the passage from राजवन्नावात to विशेषः. [8] vii, 23. [9] vii, 20. [10] vii, 21. [11] vii, 22. [12] vii, 25. [13] vii, 24. [14] *I.e.* अना (vii, 21). असंबन्धत्वात. [15] vii, 23. [16] vii, 20. [17] vii, 26. [18] iv, 48. [19] iv, 4. [20] इत्यसिद्ध° R.—°सुपा° R and T; vii, 26. [21] vii, 2.

Hē. iii, 3.

वैतत्तदोः ॥ ३० ॥

अद्नाभ्यामेतत्तद्भ्यां परस्य सोर्डो[1] वा भवति। सो। इदमेतत्किंयत्तद्भ्य इति[2] ङिणादेशः। तिणा। किंयत्तद्भ्यो ङस इति[3] सश्चादेशे। तास। आमि। किंतद्भ्यां सश्चिति[4] तस्मिन्नेवादेशे। तास। तदिदमेतदामिति[5] सेसिंआदेशयोः। से। सिं। ङसौ।

Hē. iii, 67.

डो तदः ॥ ३१ ॥

तदः परस्य ङसेर्डिदोत्त्वं[6] तु[7] भवति। तो। म्हा ङसेरिति[8] म्हादेशे। तम्हा। ङौ कालेऽभिधेये। ङिरिआडाहेडाला काले[9]। तइआ। ताहे। ताळा। वैकल्पिकादेशाभावे सर्वशब्दवत्।

Hē. iii, 70.

क्वचित्सुपि तदो णः ॥ ३२ ॥

क्वचित्सुपि परे तच्छब्दस्य णस्तु[10] भवति। क्वचिदिति लक्षणानुसारेण। णिणा। णेण। णेहिं॥

यद्शब्दस्य भेदः।

Hē. i, 245.

आदेर्जः ॥ ३३ ॥

पदादेर्यस्य जो भवति। जो। आमि डेसिंआदेशौ[11] णश्चादेशश्च[12]। जेसिं। जाणं। जाण। शेषं तच्छब्दवत्॥

एतद्शब्दस्य भेदः। तस्यौ सोऽक्लीब इति[13] तकारस्य सकारः। वैतत्तदोः[14]। एसो। एस। सकारादेशाभावपक्षे[15] प्रायो लुगिति[16] लुक्। एओ।

Hē. iii, 85.

सुनैसइणमोइणं ॥ ३४ ॥

एतदः सुना सह एस इणमो इणं इत्यादेशा वा भवन्ति। एस। इणमो।

---

[1] iv, 7. [2] vii, 5. [3] vii, 6. [4] vii, 7; किंयत्तद्भ्यो ङस इति T. [5] vii, 16. [6] iv, 7. [7] ii, 3. [8] vii, 8. [9] vii, 10. [10] ii, 3. [11] iv, 34. [12] iv, 20. [13] vii, 29. [14] vii, 30. [15] R om. °देशा°. [16] iv, 26.

इणं। सुवन्तादेशत्वात्त्रिष्वपि लिङ्गेष्वेतान्येव रूपाणि। तृतीयैकवचने[1]। इदमेतत्किंयत्तद्भ्य इति[2] ङिणादेशः। एइणा। चतुर्थ्याम्। तदिदमेतदा-मिति[3] सेसिंआदेशौ। ङसौ।

एत्तोएत्ताहे ङसिनैतदः ॥ ३५ ॥ Hē. iii, 82.

एतदो ङसिना सह एत्तो एत्ताहे इत्येतौ तु[4] भवतः। एत्तो। एत्ताहे। ङौ। ङेस्त्थस्सिंम्मि[5]। एत्थस्सिं[6]।

त्थे डेल् ॥ ३६ ॥ Hē. iii, 83.

एतदः त्थे परे डानुबन्धं लानुबन्धं[7] च एत्त्वं भवति। अलोऽन्त्यस्येत्य-न्त्यादेशः[8]। डित्त्वाट्टिलोपः[9]। संयोग इति[10] स्वरूपेण ह्रस्वः। एत्थ।

एतो म्मावदितौ[11] वा ॥ ३७ ॥ Hē. iii, 84.

ङ्यादेशे म्मौ[12] परे एतच्छब्दस्य एत एकारस्य अ इ इत्येतौ वा भवतः। अम्मि। इम्मि। पक्षे। एम्मि। शेषं सर्वशब्दवत्॥

शरद्शब्दस्य भेदः। अन्त्यलोपे[13] प्राप्ते।

शरदामल्[14] ॥ ३८ ॥ Hē. i, 18.

शरत्प्रकाराणामन्त्यहलोऽत्त्वं भवति। शोस्सलिति[15] सल्।

शरत्प्रावृट् ॥ ३९ ॥ Hē. i, 31.

शरत्प्रावृषौ पुंसि प्रयोक्तव्यौ। सरओ। वृषशब्दवत्प्रक्रिया॥

षकारान्तः प्रावृष्शब्दः। शरत्प्रावृडिति[16] पुंस्त्वम्। रेफलोपः[17]। ऋतोऽदित्यत्त्वे[18] प्राप्ते।

---

[1] T om. this word. [2] vii, 5. [3] vii, 16. [4] T om. तु; ii, 3. [5] iv, 35. [6] एत्थस्सिं R and T. [7] ii, 4. [8] Pā. i, 1, 52. [9] iv, 7. [10] iv, 25. [11] Thus Tri.; ङेर्म्मावेतौ दितौ R, ङेर्म्मावेत् अदितौ T. [12] म्मौ Tri.[1] and Tri.[3], मौ Tri.[2], R, and T. [13] vii, 2. [14] °मत् Tri. [15] iv, 29. [16] vii, 39. [17] iv, 32. [18] iv, 3.

Hē. i, 131.

ऋतुगे ॥ ४० ॥

ऋत्वादिष्वादेर्ऋत उत्त्वं भवति। प्रायो लुगिति[1] वकारस्य लुक्। अन्त्यलोपे[2] प्राप्ते।

Hē. i, 19.

दिक्प्रावृषि ॥ ४१ ॥

दिक्प्रावृषोरन्त्यहलः सो भवति। पाउसो। शेषं पूर्ववत्॥
सकारान्तो यशस्शब्दः।

Hē. i, 32.

स्नमदामशिरोनभो नरि ॥ ४२ ॥

सान्तं नान्तं च शब्दरूपं नरि पुंसि प्रयोक्तव्यम्। दामन् शिरस् नभस् इत्येतान्वर्जयित्वा। इति पुंस्त्वम्। आदेर्ज इति[3] जः। अन्त्यलोपः[4]। जसो॥
अदस्शब्दस्य भेदः।

Hē. iii, 88.

सुण्यदसोऽमुः ॥ ४३ ॥

सुपि परे अदसः स्थाने अमु इति भवति। इति नित्यमम्वादेशे प्राप्ते।

Hē. iii, 87.

अहङ्वा सुना ॥ ४४ ॥

अदसः सुना सह अहत् इत्यादेशो वा भवति। तकारस्तावन्मात्रप्रदर्शनार्थः। तेन स्त्रियामात्वं न भवति। अह। पचे। अमू[5]। ङौ।

Hē. iii, 89.

इआओ म्मौ[6] ॥ ४५ ॥

अदसो ङिवचनादेशे म्मौ[6] परे इअ अअ इत्यादेशौ वा भवतः। इअम्मि। अअम्मि। पचे। अमुम्मि[7]। शेषं तरुशब्दवत्॥

इति पुल्लिङ्गाः परिसमाप्ताः॥

---

[1] iv, 26. [2] vii, 2. [3] vii, 33. [4] vii, 2. [5] vii, 43.
[6] Thus Tri.; मौ R and T; iv, 30. [7] vii, 43.

Eighth Section.

अथ स्त्रीलिङ्गाः प्रदर्श्यन्ते ॥

रेफान्तो गिर्शब्दः[1]। अन्त्यलोपे[2] प्राप्ते।

रो रा ॥ १ ॥ Hē. i, 16.

स्त्रीलिङ्गस्यान्त्यरेफस्य रा इत्यादेशो भवति। गिरा। पएहाशब्दवत् ॥

मकारान्तः किंशब्दः। सौ। चतसि च किमो ल्कः[3]। इति कादेशः। टाप्[4]। जसादिषु।

किंयत्तदोऽस्वमामि सुपि ॥ २ ॥ Hē. iii, 33.

सुअमआंवर्जिते सुपि परे किंयत्तदः स्त्रियां ङीव्वा भवति। कीओ। अमि ङोप्प्रतिषेधात्कः। चतुर्थ्येकवचने अनदन्तलेऽपि बङ्गलाधिकारात्[5] किंयत्तद्भ्यो ङस इति[6] सश्चादेशे। कीस। कास।

ईतस्सेस्सा[7] ॥ ३ ॥ Hē. iii, 64.

ईकारान्तेभ्यः किंयत्तद्भ्यः परस्य ङसः से[8] स्सा इति वा भवति। कीसे[9]। संयोग इति[10] ह्रस्वः। किस्सा[11]। आमि। अस्वमामीति निषेधात्[12] ङीत्व भवति। आमामिति[13] बङ्गवचनाङुसिंआदेशः सश्चादेशश्च[14]। कीसिं। कास। ङौ। अनिदमेतदस्त्विति[15] हिंआदेशः। तत्र बाङ्गलकादेव किंयत्तदोऽस्वमामीति[16] ङीत्व भवति। काहिं। टाबन्ते शेषं पएहाशब्दवत्। ङीबन्ते लक्ष्मीशब्दवत् ॥

इदंशब्दस्य भेदः। पुंसि सुनेति[17] इमिआदेशः। इमिआ। पक्षे। इदम इम इतीमादेशः[18]। इमा। तत्र।

---

[1] गीर्॰ R and T. [2] vii, 2. [3] vii, 4. [4] Pā. iv, 1, 4. [5] iii, 1. [6] vii, 6. [7] ईतस्सेसार् Tri. [8] ङसेः स्से R and T. [9] किस्से R and T. [10] iv, 25. [11] T places किस्सा before संयोग॰ [12] viii, 2. [13] iv, 34. [14] vii, 7. [15] iv, 36. [16] viii, 2. [17] vii, 12. [18] vii, 11.

Hē. iii, 32.

पुंसोऽजातेर्ङीब्वा ॥ ४ ॥

अजातिवाचिनः पुंशब्दात् स्त्रियां वर्तमानात् ङीप्प्रत्ययो वा[1] भवति। इति विशेषेण प्राप्ते बहुलाधिकाराच्च[2] विशेषे यं[3] भवति। इमीओ। इमीए। इमीणं। इत्यादि। द्वितीयातृतीययोष्टासस्सि णे इति[4] णादेशः। णं। णिं वा। इहेणं ज्यमेतीणमादेशे[5]। इणं। भिस्सुपोः। अत्सुप्स्सिंहिस्सि[6] इत्यत्त्वे तु। आहि। आसुं[7]। चतुर्थ्या सेसिंडेसिंआदेशाः[8]। ङौ। इहेणं ज्यमेतीहादेशे[9]। इह। शेषं सर्वशब्दवत्॥

भकारान्तः ककुभ्शब्दः।

Hē. i, 17, 21.

हः क्षुत्ककुभि ॥ ५ ॥

क्षुध् ककुभ् इत्येतयोरन्त्यहलो हकारो भवति। प्रायो लुक्[10]। कउहा॥

धकारान्तः क्षुधशब्दः। ख इति वर्तमाने।

Hē. ii, 3.

क्षः ॥ ६ ॥

चकारस्य खो भवति। इति खत्वे प्राप्ते स्नुहादित्वाच्छः[11]। हः क्षुत्ककुभीति[12] हत्वम्। छुहा॥

दकारान्तस्तद्शब्दः। सो। तस्सौ सोऽक्लीबे[13]। इति सकारः। सा। जसादिषु किंयच्छब्दवत्। चतुर्थ्याम्। तदिदमेतदामिति[14] सेसिंआदेशौ। से। सिं। क्वचित्सुपि तदो णः[15]। णं। तं। णाए। ताए। णाहि। ताहि॥

यद्शब्दः किंशब्दवत्। आमि न सश्चादेशः[16]। जा[17]॥

एतद्शब्दस्य भेदः। सो। सुनीसदृणमोदृणे[18]। पक्षे। तस्सौ स इति[19] सकारः। एसा। प्रायो लुगिति[20] लुकि। एआ। चतुर्थ्याम्। तदिदमेतदामिति[21]

---

[1] T om. वा. [2] iii, 1. [3] Pā. vi, 4, 148. [4] vii, 13. [5] vii, 14. [6] vii, 15. [7] आसु R. [8] सेस्सि° R, सेसिं° T.—vii, 16; iv, 34. [9] vii, 14. [10] iv, 26. [11] iv, 2. [12] viii, 5. [13] vii, 29. [14] vii, 16. [15] vii, 32. [16] vii, 7. [17] T om. जा. [18] vii, 34. [19] vii, 29. [20] iv, 26. [21] vii, 16; R om. चतु° to °मिति.

सेसिंआदेशौ । से । सिं । एआणं । ङीपि[1] । एईणं । ङसौ । एत्तोएत्ताहे ङसिनैतद्:[2] । एत्तो । एत्ताहे । शेषं सर्वशब्दवत् ॥

प्रतिपद्शब्दस्य भेदः ।

प्रतिगेऽप्रतीपगे ॥ ७ ॥ Hē. i, 206.

प्रत्यादिषु तवर्गस्य डो भवति । अप्रतीपगे । प्रतीपादिषु न भवति ।

तु समृद्ध्यादौ ॥ ८ ॥ Hē. i, 44.

समृद्ध्यादिष्वादेरवर्णस्य दीर्घस्तु[3] भवति ।

अविद्युति स्त्रियामाल् ॥ ९ ॥ Hē. i, 15.

स्त्रीलिङ्गस्यान्त्यहलो लिदात्त्वं[4] भवति । अविद्युति । विद्युच्छब्दे न भवति । रेफलोपः[5] । पो व इति[6] वत्वम् । पाडिवआ । पडिवआ ॥

तकारान्तः सरित्शब्दः । अविद्युति स्त्रियामालित्याकारः[7] । सरिआ ॥

सकारान्तोऽप्सरसशब्दः ।

स आयुरप्सरसोः ॥ १० ॥ Hē. i, 20.

अनयोरन्त्यहलः सो वा भवति ।

थ्यश्चत्सप्सामनिश्चले ॥ ११ ॥ Hē. ii, 21.

निश्चलवर्जिते थ्य श्च त्स प्स इत्येतेषां छो[8] भवति । अच्छरसा । पक्षेऽन्त्यलोपः[9] । अच्छरा । बहुर्थवाचित्वात्सर्वत्र बहुवचनमेव । अच्छरसाओ । अच्छराओ । अप्सरा इत्यपि दर्शनात्प्रायिकबहुत्वमिति[10] क्षीरस्वामी ॥

अदस्शब्दस्य भेदः । सौ । अहदो सुनेति[11] अहदादेशः । सुबन्तादेशत्वात्[12] तपरकरणाद्वा टाप्[13] भवति । अह । पक्षे[14] । सुण्यदसोऽमुः[15] । अमू । शेषं तनुशब्दवत् ॥

इति स्त्रीलिङ्गाः परिसमाप्ताः ॥

---

[1] viii, 4; R places ङीपि before एआणं. [2] vii, 35. [3] ii, 3. [4] ii, 4. [5] iv, 32. [6] iv, 62. [7] viii, 9. [8] च्छो T. [9] vii, 2. [10] This quotation occurs actually in Kshīrasvāmin's commentary on the *Amarakōśa*, edited by Borooah, p. 68 (i, 1, 51). [11] vii, 44. [12] T adds वा. [13] Pā. iv, 1, 4. [14] T om. this word. [15] vii, 43.

Ninth Section.

अथ नपुंसकलिङ्गाः प्रदर्श्यन्ते[1] ॥

चतुरशब्दः पुल्लिङ्गवत । मकारान्तः किंशब्दः । स्वमोः ।

Hē. iii, 80. **किं किं ॥ १ ॥**

क्लीबे वर्तमानः किंशब्दः स्वमा सहितः किमेव भवति । अन्यच्च कादेशः[2] । प्रथमाद्वितीययोर्गुणशब्दवत् । अन्यत्र पुल्लिङ्गवत् ॥

इदंशब्दस्य भेदः ।

Hē. iii, 79. **क्लीबे स्वमेदमिणमिणमो ॥ २ ॥**

नपुंसकस्येदंशब्दस्य सु अम् इत्येताभ्यां सहितस्य इदं इणं इणमो इत्यादेशा भवन्ति । इदं । इणं । इणमो । प्रथमाद्वितीययोर्गुणशब्दवत् । शेषं पुल्लिङ्गवत् ॥

यत्तदेतदामन्त्यलोपे[3] प्रथमाद्वितीययोर्गुणशब्दवत् । अन्यत्र पुल्लिङ्गवत् । जं । तं । एस । इणमो । इणं । एअं । इत्यादि ॥

सकारान्तो धनुसशब्दः ।

Hē. i, 22. **धनुषि वा[4] ॥ ३ ॥**

धनुशब्देऽन्त्यहलो हो वा भवति । न इति[5] णत्वम् । धणुहं । धणुं । सकारान्तेऽपि[6] बाहुलकान्नपुंसकत्वम् ॥

अदसशब्दस्य भेदः ।

अहवा सुणा[7] । अह । सुण्यदसोऽमुः[8] । अमु ॥

इति हलन्ताः परिसमाप्ताः ॥

---

[1] उच्यन्ते T. [2] vii, 4. [3] vii, 2. [4] हुः T. [5] iv, 47. [6] vii, 42. [7] vii, 44. [8] vii, 43.

TENTH SECTION.

युष्मद्शब्दस्य भेदः ॥

सौ ।

युष्मत्सुना तुवंतुंतुमंतुह ॥ १ ॥ Hē. iii, 90.

युष्मच्छब्दः सुना सहितः तुवं तुं तुमं तुह इति चतुर आदेशान्प्राप्नोति। तुवं। तुं। तुमं। तुह। तं इति तु त्वमित्यस्य सिद्धस्य जवरामधश्चेति[1] वलोपे द्रष्टव्यम्। जसि।

जसा भेतुब्भेतुय्हेउय्हेतुब्भ[2] ॥ २ ॥ Hē. iii, 91.

युष्मज्जसा सह भेआदिपञ्चकमापद्यते[3]।

वा ब्भो[4] म्हब्भौ ॥ ३ ॥ Hē. iii, 104.

युष्मदादेशसंबन्धिनो द्वितीयस्य भकारस्य[5] म्ह ब्भ इत्येतौ वा भवतः। इति तुब्भे तुब्भ[6] इत्यनयोर्विकल्पेन म्हब्भौ प्रत्येकं भवतः। भे। तुब्भे[7]। तुम्हे। तुब्भे। तुय्हे। उय्हे। तुब्भ[8]। तुम्ह। तुब्भ। इति नव रूपाणि। शसि।

शमा तुमेतुए च ॥ ४ ॥ Hē. iii, 92.

युष्मद्मा सह तुमे तुए इत्येतौ चकारात्तुवमादि चतुष्टयं[9] चापद्यते। तुमे। तुए। तुवं। तुं। तुमं। तुह। इति षट्। तं इति तु त्वामित्यस्य वलोपे[10] स्वरस्य बिन्दुमीति[11] हस्वे च द्रष्टव्यम्। शसि।

शसा वो च ॥ ५ ॥ Hē. iii, 93.

युष्मच्छसा सह वो इति चकारात् भे[12] इत्यादींश्चादेशानापद्यते। वो। भे। तुब्भे[13]। तुम्हे। तुब्भे। तुय्हे। उय्हे। तुब्भ[14]। तुम्ह। तुब्भ। इति दश। तृतीयैकवचने।

---

[1] iv, 32. [2] भे° Tri.[1] and Tri.[3], हे° Tri.[2], R, and T; °तुब्भे° Tri.[1] and Tri.[3], °तुह्मे° Tri.[2], °तुह्हे° R and T; °उय्हेतुब्भ Tri.[3], °तुय्भेतुब्भ Tri.[1], °तुह्मेउय्हेतुह्म Tri.[2], °उय्हेतुह्ह R, °तह्हउय्हे T. [3] हे° R and T. [4] ब्भो Tri.[1] and Tri.[3], ह्हो Tri.[2], R, and T. [5] हकारस्य R and T. [6] तुह्हे तुह्ह R and T; see Pischel, *de gr. Pr.*, p. 3. [7] हे। तुह्हे R and T. [8] तुह्ह R and T. [9] x, i. [10] iv, 32. [11] v, 5. [12] हे R and T; x, 2 and 3. [13] हे। तुह्हे R and T. [14] तुह्ह R and T.

Hē. iii, 94. **टा भेतेदेदितुमंतुमइ**[1] ॥ ६ ॥

युष्मट्टावचनेन सह भे[2] इत्यादि पञ्चकमापद्यते[3]।

Hē. iii, 94, 101. **ङिटाभ्यां तुमएतइतएतुमाइतुमे**[4] ॥ ७ ॥

युष्मत् ङिटाभ्यां सह तुमए इत्यादि पञ्चकं चापद्यते। भे[5]। ते। दे। दि। तुमं। तुमइ। तुमए। तइ[6]। तए[7]। तुमाइ। तुमे। इति दश[8]। भिसि।

Hē. iii, 95. **भिसा भेतुब्भेह्युब्भेह्युय्हेहितुय्हेहि**[9] ॥ ८ ॥

युष्मद्भिसा सह भे[10] इत्यादीनि पञ्च[11]। तुब्भेहि उब्भेहीत्यनयोर्वा[12] ब्भो[13] म्हज्झाविति[14] म्हज्झादेशयोश्चत्वारि च रूपाण्यापद्यते[15]। भे। तुब्भेहि[16]। तुम्हेहि। तुज्झेहि। उब्भेहि[17]। उम्हेहि। उज्झेहि। उय्हेहि। तुय्हेहि। इति नव। ङसि।

Hē. iii, 99. **तुब्भोब्भोय्हतइतुहंतुहतुम्हंतुवतुमतुमेतुमाइतुमोदेतेदि-तुइए**[18] **ङसा** ॥ ९ ॥

युष्मत् ङसा सह तुब्भाद्यष्टादशकमापद्यते[19]। तुब्भोब्भयोर्वा[20] म्हज्झौ[21]। तुब्भ[22]। तुम्ह। तुज्झ। उब्भ[23]। उम्ह। उज्झ। उय्ह। तइ। तुहं। तुह[24]। तुम्हं[25]। तुव। तुम। तुमे। तुमाइ। तुमो। दे। ते। दि। तु। इ। ए। इति द्वाविंशतिः। आमि।

---

[1] भे° Tri.[3], हे° Tri.[1], Tri.[2], R, and T. [2] हे R and T. [3] Read षड्भा° (?). [4] °तुइ° Tri.[2], Tri.[3], and R; °तुए° the same and T. [5] हे R and T. [6] तुइ R and T. [7] तुए R. [8] Read इत्येकादश (?). [9] Thus Tri.[1] and Tri.[3]; हेतुहेह्युहेह्यु° R and T. [10] हे R and T. [11] T adds आपद्यते. [12] तुहेहि उहेहीत्य° R and T. [13] हो R and T. [14] x, 3. [15] रूपाणि भवन्ति T. [16] हे। तुहेहि R and T. [17] उहेहि R and T. [18] Thus Tri., तुहोहोय्ह° R and T; °तुइतुहतुहं° T; °तुम्हं° Tri.[1] and Tri.[2], °तुम्ह° Tri.[3], R, and T. [19] तुहाद्य° R and T. [20] तुहोहयोर्वा R and T. [21] x, 3. [22] तुहह R and T. [23] उहह R and T. [24] तुह। तुहं T. [25] तुम्ह R and T.

उम्हाणतुब्भंतुब्भाणतुमाणतुवाणतुहाणतुब्भवो-भेत्वामा[1] ॥ १० ॥ Hē. iii, 100.

युष्मदामा सह उम्हाणादि दशकमापद्यते । तुब्भं तुब्भाण तुब्भ[2] इत्येतेषां वा म्हज्ञौ[3] । उम्हाणतुब्भाणतुमाणतुवाणतुहाणानां[4] क्वासु-पोरिति[5] बिन्दुविकल्पः । उम्हाणं । उम्हाण । तुब्भं । तुम्हं । तुज्झं[6] । तुब्भाणं । तुब्भाण[7] । तुम्हाणं । तुम्हाण । तुज्झाणं । तुज्झाण । तुमाणं । तुमाण । तुवाणं । तुवाण । तुहाणं । तुहाण । तुब्भ[8] । तुम्ह । तुज्झ । वो । भे[9] । तु । इति चयोविंशतिः । ङसौ ।

तुब्भतहिंतोतुय्ह[10] ङसिना ॥ ११ ॥ Hē. iii, 97.

युष्मत् ङसिना सह तुब्भ[11] तहिंतो तुय्ह इति त्रीणि रूपाण्यापद्यते । तुब्भेत्वस्य[12] वा म्हज्ञौ[13] । तुब्भ[14] । तुम्ह । तुज्झ । तहिंतो । तुय्ह ।

अथ ङसौ परे प्रकृत्यादेशा उच्यन्ते ।

तुतुइ[15] ङिम्ङसौ ॥ १२ ॥ Hē. iii, 96, 102, 103.

ङिप् सप्तमी । सप्तम्यां ङसौ च परतो युष्मद्यथासंख्यं तु तुइ इत्येतावापद्यते । ङिम्ङस्योर्यथाप्राप्तं तुवादय आदेशा भवन्ति ।

तुवतुमतुहतुब्भ[16] ॥ १३ ॥ Hē. iii, 96, 102, 103.

ङिपि ङसौ च परे युष्मत् तुव तुम तुह तुब्भ[17] इति चत्वार्यापद्यते । तुब्भेत्वस्य[18] वा म्हज्ञौ[19] । ङिम्ङस्योर्यथाप्राप्तमेव[20] । ईप्सितयथासंख्य-

---

[1] तुम्हाण° Tri.; °तुहह° (without *anusvāra*) R and T; °तुहहाण° R and T; °तुवाणतुमाण° Tri.[1] and Tri.[2]; °तुहहवोहे° R and T. [2] तुहह तुहहाण तुहह R, तुहह तुहहाण इत्यनयोर्वा T. [3] x, 3.—T adds इति म्हज्ञादेशौ. [4] उम्हाणतुहहाण° R, उम्हाणतुम्हाण° T. [5] iv, 14. [6] तुहह । तुम्ह । तुज्झ R and T. [7] तुहहाणं । तुहहाण R and T; the latter places them after तुज्झाण. [8] तुहह R and T. [9] हे R and T. [10] तुब्भ° Tri.[1] and Tri.[3], तुहह° Tri.[2], R, and T; °तुहिंतो° Tri. [11] तुहह R and T. [12] तुहहे° R and T. [13] x, 3. [14] तुहह R and T. [15] °तइ Tri.[1] [16] °तुब्भ Tri.[1] and Tri.[3], °तुज्झ Tri.,[2] °तुहह R and T. [17] तुहह R and T. [18] तुहहे° R and T. [19] x, 3. [20] °मेवमीप्सित° T.

सिद्ध्यर्थो योगविभागः। तच तुह[1] इत्यादेशादुत्तरस्य ङसेः पुंनपुंसकयोर्नृनपि ङसिङसोरिति[2] णोआदेशो हिंतो इत्यादि चतुष्टयं[3] च। स्त्रियां तु ङसेश्चाश्चाश्चिश्चे इति[4] चतुष्टयं च। तुवादिषट्के पुंनपुंसकयोः सुगादेशो[5] हिंतो इत्यादि चतुष्टयं[6] च। स्त्रियां तु पूर्ववत्। तत्राकारान्तत्वेन टापि नातश्चेति[7] निषेधाच्छादेशोऽनदन्तत्वान्नास्तीति केचिदाहुः। अन्ये तु बाहुलकादच टाप् न क्रियते। ततश्च शादेशादयश्च[8] भवन्तीत्याहुः। तच तुहआदेशे। तुहणो। तुहहिंतो। तुहत्तो। तुहस्सो। तुहउ।[9] तुवादिषट्के। तुवा। तुवाहि। तुवाहिंतो। तुवत्तो। तुवास्सो। तुवाउ। एवं तुमा। तुहा। तुब्भा[10]। तुम्हा। तुज्झा। इत्यादयः प्रत्येकं[11] षड्भिदाः स्युः[12]। इति पुंनपुंसकयोर्ङस्यन्तादेशैः[13] सह ङसौ षट्चत्वारिंशद्भिदाः। स्त्रियां तु। तुहाअ। तुहाआ। तुहाइ। तुहाए। तुहाहिंतो। तुहत्तो। तुहाओ। तुहाउ।[14] तुवादिषट्के। तुवाअ। तुवाआ। तुवाइ। तुवाए। तुवा। तुवाहि। तुवाहिंतो। तुवत्तो। तुवाओ। तुवाउ। एवं तुमाअ। तुहाअ। तुब्भाअ[15]। तुम्हाअ। तुज्झाअ। इत्यादयः प्रत्येकं[16] दश भिदाः। इति टावभावपक्षे त्रिसप्ततिः[17]। टापि पक्षपञ्चाशत्[18]। एताश्च भिदाः प्रक्रियावशेन प्रदर्शिताः। यथादर्शनं प्रयोज्यम्। न हि वचिरन्तिपरः प्रयुज्यत इति हि भाष्यम्[19]। भ्यसि।

Hē. iii, 98.

उम्होय्हतुय्हतुब्भ[20] भ्यसि[21] ॥ १४ ॥

भ्यसि परे युष्मत् उम्ह उय्ह तुय्ह तुब्भ[22] इति चत्वार्यापद्यते। भ्यसस्तु यथाप्राप्तम्। तुब्भेत्यस्य[23] वा म्हज्झौ[24]। उम्हासुंतो। उम्हेसुंतो[25]। उम्हाहि। उम्हेहि[26]। उम्हाहिंतो। उम्हेहिंतो। उम्हत्तो। उम्हाओ।

---

[1] x, 12. [2] iv, 54. [3] iv, 21. [4] v, 8. [5] iv, 23. [6] iv, 21. [7] v, 7. [8] v, 7; iv, 23 and 24; शादेशादेशौ च R. [9] T adds wrongly एवं तुआदेशेऽपि. [10] तुहहा R and T, which places it after तुज्झा. [11] R om. this word. [12] T om. स्युः. [13] x, 11. [14] T adds again एवं तुआदेशेऽपि. [15] तुहहाअ R and T, which places it after तुज्झाअ. [16] R om. this word. [17] षट्सप्ततिः T. [18] अष्टपञ्चाशत् T. [19] The *Siddhāntakaumudī*, तिङन्ते अदादयः, before Pā. iii, 4, 83, says:—वच परिभाषणे। वक्ति। वक्तः। अयमन्तिपरो न प्रयुज्यते. [20] °तुब्भ Tri., °तुहह R and T. [21] T om. भ्यसि. [22] तुहह R and T. [23] तुहहे° R and T. [24] x, 3. [25] R om. this word. [26] T places these two words after उम्हाउ.

उम्हाउ । एवं उय्हासुंतो । तुय्हासुंतो । तुब्भासुंतो[1] । तुम्हासुंतो । तुज्झासुंतो । इत्यादयो नव नव[2] भिदाः । आहत्य पुंनपुंसकयोश्चतुष्पञ्चाशत् भिदाः[2] । स्त्रियां तु टाबभावे पूर्ववच्चतुष्पञ्चाशत् । टापि तु । उम्हासुंतो । उम्हाहिंतो । उम्हत्तो । उम्हाओ । उम्हाउ । एवं उय्हासुंतो । तुय्हासुंतो । तुब्भासुंतो[3] । तुम्हासुंतो । तुज्झासुंतो । इत्यादयः पञ्च पञ्च भिदाः । आहत्य चिंशत् । ङौ । ङिटाभ्यां तुमएतइतएतुमाइतुमे[4] इत्यादेशपञ्चके । तुमए । तइ । तए[5] । तुमाइ । तुमे । तुतुइ ङिम्ङसाविति[6] तु तुआदेशे ङेर्मिरिति[7] मिरि । तुम्मि । तुव तुम तुह तुब्भ[8] तुम्ह तुज्झ[9] इत्यादेशषट्के[10] । ङेस्त्यस्मिंमि[11] । अनिदमेतदस्तु किंयत्तदस्स्त्रियां च हिं[12] । ङेर्डे[13] । इत्यादेशेषु । तुवत्थ । तुवस्सिं । तुवम्मि । तुवहिं । तुवे । एवं तुमत्थ । तुहत्थ । तुब्भत्थ[14] । तुम्हत्थ । तुज्झत्थ । इत्यादयः पञ्च पञ्च भिदाः । आहत्य पुंनपुंसकयोरेकचिंशच्छिदाः[15] । ङ्यन्तादेशैः[16] सह षट्चिंशत् । स्त्रियां तु न मिरादेशो[17] ङेस्त्यस्मिंमि इत्यादेशपञ्चकं[18] च । तुअ । तुआ । तुइ । तुए । तुवाअ । तुवाआ । तुवाइ । तुवाए । एवं तुमाअ । तुहाअ । तुब्भाअ[19] । तुम्हाअ । तुज्झाअ । इत्यादयश्चतस्रश्चतस्रो भिदाः । आहत्य टाबभावपक्षे[20] अष्टाविंशतिः । ङ्यन्तादेशैः[21] सह चत्वारिंशत् । टापि । तुवादिषट्के[22] तिस्रस्तिस्रो भिदाः । त्वादेशे[23] चतस्रः । इति ङ्यन्तादेशैः सह[24] सप्तविंशतिः । सुपि । तुतुइ[25] ङिम्ङसाविति[26] त्वादेशे तुवादिषट्के च[27] क्लासुपोरिति[28] बिन्दुविकल्पे । तूसुं । तूसु । तुवेसुं । तुवेसु । इत्यादयो लिङ्गत्रयेऽपि चतुर्दश भिदाः । भ्यसि ङिपि च पुंनपुंसकवत् ॥

इति युष्मदशब्दविभागः ॥

---

[1] तुहहा° R and T. [2] T om. this word. [3] तुहहा° R and T. [4] °तुइतुए° R and T; x, 7. [5] तुइ । तुए R and T. [6] x, 12. [7] iv, 30. [8] तुहह R and T. [9] R om. these two words. [10] x, 13. [11] iv, 35. [12] iv, 36. [13] iv, 31. [14] तुहहत्थ R and T. [15] °शच्छिदाः T. [16] ङन्ता° R and T; x, 7. [17] iv, 30. [18] See notes 11–13. [19] तुहहाअ R and T. [20] See the commentary on x, 13. [21] x, 7. [22] तुहहादि° R; x, 13. [23] x, 12. [24] R om. these two words; x, 7. [25] R and T om. तुइ. [26] x, 12. [27] x, 13. [28] iv, 14.

Eleventh Section.

अथास्मद्शब्दः प्रदर्श्यते ॥

सौ ।

Hē. iii, 105. **अस्मत्सुना अम्हिहमहअमहमहम्म्यम्मि**[1] ॥ १ ॥

अस्मत्सुना सह अम्ह्यादि षट्कमापद्यते । अम्हि । हं । अहअं । अहं । अहम्मि[1] । अम्मि । अस्मि ।

Hē. iii, 106. **मोभेवअं**[2] **जसा** ॥ २ ॥

अस्मज्जसा सह मो भे वअं[3] इति चोनादेशानापद्यते[4] ।

Hē. iii, 106. **अम्हेअम्होअम्ह** ॥ ३ ॥

अस्मज्जसा सह अम्हे अम्हो अम्ह इति चापद्यते । योगविभाग उत्तरार्थः । मो । भे[5] । वअं[6] । अम्हे । अम्हो । अम्ह ।

Hē. iii, 107. **मंणेणंमिमिमंममंअम्मिअहंअम्हमम्ह**[7] **अमा** ॥ ४ ॥

अस्मदमा सह मं णे इत्यादि दशकमापद्यते । मं । णे । णं । मि । मिमं[8] । मम[9] । अम्मि । अहं । अम्ह । मम्ह । अस्मि ।

Hē. iii, 108. **णे च शसा** ॥ ५ ॥

शसा सहास्मत् णे इति चकारात् अम्हे अम्हो अम्ह इति[10] चापद्यते । णे । अम्हे । अम्हो । अम्ह । तृतीयैकवचने ।

Hē. iii, 109, 115. **मिमइममाइमएमे ङिटा** ॥ ६ ॥

अस्मात् ङिवचनेन टावचनेन च सह मोत्यादि पञ्चकमापद्यते । मि । मइ । ममाइ । मए । मे ।

---

[1] म्मि or मि for अहम्मि Tri. [2] °भे° Tri.[1] and Tri.[3], °हे° Tri.[2], R and T; °वअं Tri., °वयं R and T. [3] हे वयं R and T. [4] R om. आदेशान्. [5] हे R and T. [6] वयं T. [7] मिँ for मिमं T; मम for ममं Tri.[1] and T, मं R; °मम्हअम्ह Tri. [8] मिँ T. [9] मम R and T. [10] xi, 3.

ममंणेमआइममए[1] टा ॥ ७ ॥ Hē. iii, 109.

अस्मट्टावचनेन सह मम णे मआइ[1] ममए इति चतुर आदेशानापद्यते। मम। णे। मआइ[1]। ममए। भिसि।

णेअम्हेह्यम्हाह्यम्हेअम्ह भिसा ॥ ८ ॥ Hē. iii, 110.

अस्मत् भिसा सह णे इत्यादि पञ्चकमापद्यते। णे। अम्हेहि। अम्हाहि। अम्हे। अम्ह। ङसि।

अम्हंमज्झंमज्झमइमहमहंमे[2] च ङसा ॥ ९ ॥ Hē. iii, 113.

अस्मात् ङसा सह अम्हं इत्यादि सप्तकं चकाराद्म्हममौ चापद्यते[3]। अम्हं। मज्झं। मज्झ[4]। मइ। मह। महं। मे। अम्ह। मम। आमि।

अम्हेअम्होअम्हाणममाणमहाणमज्झाणमज्झाम्हा-म्हंणेणो आमा ॥ १० ॥ Hē. iii, 114.

अस्मदामा सह अम्हे इत्यादेकादशकमापद्यते[5]। क्वासुपोरिति[6] बिन्दुविकल्पः। अम्हे। अम्हो। अम्हाणं। अम्हाण। ममाणं। ममाण। महाणं। महाण। मज्झाणं। मज्झाण। मज्झ। अम्ह। अम्हं। णे। णो। इति पञ्चदश। ङसौ।

मइममम्हमज्झ ङसौ ॥ ११ ॥ Hē. iii, 111.

अस्मात् ङसौ परतो मइ इत्यादि चतुष्कमापद्यते। ङसेस्तु यथाप्राप्तम्। तच्च ममादित्रयादुत्तरस्य ङसेः हिंतो इत्यादादेशषट्के[7] अष्टादश भेदाः। मइ इत्यस्मादुत्तरस्य तु हिंतो इत्यादिचतुष्के[8] नृनपीति[9] णोआदेशे पञ्च भेदाः। मइणो। मईहिंतो। मइत्तो। मईओ। मईउ। ममा। ममाहि। ममाहिंतो। ममत्तो। ममाओ। ममाउ। एवं महा। मज्झा। इत्यादयः षट् षट् भिदाः। इति पुंनपुंसकयोस्त्रयोविंशतिः। स्त्रियां तु मइ इत्यादेशादुत्तरस्य शादि चतुष्कं[10] हिंतो इत्यादि चतुष्कं[11] च। ममादुत्तरस्य तु पूर्ववद्दशकं सप्तकं वा[12]। मईअ। मईआ। मईइ। मईए।

---

[1] मआइ Tri., ममाइ R and T. [2] °मज्झा° for °मज्झ° T. [3] xi, 12. [4] मज्झा T. [5] इत्येकादश° T. [6] iv, 14. [7] इत्यादेश° T; iv, 21–24. [8] इत्यादेशचतुष्की T; iv, 21. [9] iv, 54. [10] v, 8. [11] iv, 21. [12] See the commentary on x, 13.

महिहिंतो। महत्तो। महिओ। महिउ। ममाअ। ममाआ। ममाए। ममाइ। ममाहि। ममाहिंतो। ममत्तो। ममाओ। ममाउ। एवं महाअ। मज्झाअ। इत्यादि। आहत्याष्टचिंशद्देकोनचिंशद्वा भेदाः। भ्यसि।

Hē. iii, 112.

अम्हमम भ्यसि ॥ १२ ॥

भ्यसि परे अस्मत् अम्ह मम इत्येतावापद्यते। भ्यसस्तु यथाप्राप्तम्। तत्र सुंतो इत्यादादेशेषु[1]। अम्हासुंतो। अम्हेसुंतो। ममासुंतो। ममेसुंतो। इत्यादिनवभिदाः। आहत्य पुंनपुंसकयोः स्त्रियां टाबभावपक्षे[2] चाष्टादश भेदाः। टापि तु। अम्हासुंतो। अम्हाहिंतो। अम्हत्तो। अम्हाओ। अम्हाउ। एवं ममासुंतो इत्यादिपञ्च। आहत्य दश भेदाः। ङौ। मिमइममाइमएमे ङिटेत्यादेशपञ्चकम्[3]।

Hē. iii, 116, 117.

अम्हममम-ज्झमह ङिपि ॥ १३ ॥

ङिपि सप्तम्यां परतोऽस्मदम्हादि चतुष्कमापद्यते। ङिपो यथाप्राप्तम्। तत्र ङेरित्यस्मिंम्मीत्यादेशपञ्चके[4]। अम्हत्थ। अम्हस्सिं। अम्हम्मि। अम्हहिं। अम्हे। एवं ममत्थ। मज्झत्थ। महत्थ। इत्यादयः पञ्च पञ्च भेदाः। आहत्य पुंनपुंसकयोर्विंशतिः। ङ्यन्तादेशैः[5] सह पञ्चविंशतिः। स्त्रियां तु। अम्हाअ। अम्हाआ। अम्हाइ। अम्हाए। एवं ममाअ। मज्झाअ। महाअ। इत्यादयश्चतस्रश्चतस्रो भिदाः। आहत्य टाबभावपक्षे[6] षोडश। टापि द्वादश। ङ्यन्तादेशैः[7] सह एकविंशतिः सप्तदश वा भेदाः। सुपि। अम्हममज्झमह ङिपीत्यम्हादिचतुष्के[8] बिन्दुविकल्पे[9]। अम्हेसुं। अम्हेसु। ममेसुं। ममेसु। मज्झेसुं। मज्झेसु। महेसुं। महेसु। इत्यष्टौ भेदाः[10]। भिस्भ्यस्सुपीत्येत्त्वं[11] विकल्पेन केचिदिच्छन्ति। तत्रापि। अम्हसुं। अम्हसु। इत्यादयोऽष्टौ भेदाः। अम्हादेशे आत्त्वमपीच्छन्ति केचित्। अम्हासुं। अम्हासु। इति तदाहत्य पुंनपुंसकयोः स्त्रियां टाबभावे[12] चाष्टादश भेदाः। टापि तु। अम्हासुं। अम्हासु। इत्यादयोऽष्टौ भेदाः॥

अत्राद्यलिङ्गत्वपक्षे ङसौ णोआदेशाद्यभावात्[13] द्वाविंशतिभेदाः। भ्यसि ङिपि च पुंनपुंसकवत्॥

इत्यस्मद्शब्दविभागः॥

---

[1] iv, 27. [2] See the commentary on x, 13. [3] xi, 6. [4] °मीत्यादेश° T; see p. 43, notes 11–13. [5] xi, 6. [6] See the commentary on x, 13. [7] xi, 6. [8] xi, 13. [9] iv, 14. [10] इत्यादयोऽष्टौ भिदाः T. [11] iv, 16. [12] See the commentary on x, 13. [13] iv, 54; see the commentary on xi, 11.

Twelfth Section.

अथ प्रातिपदिकावस्थायामेव केषांचित्प्रक्रियाविशेषः प्रदर्श्यते ॥

दर्शनम् । मनस्विनी । अतिमुक्तकम्[1] ।

र्शेषतप्तवज्रेष्वित्[2] ॥ १ ॥ Hē. ii, 105.

र्श र्ष[3] इत्येतयोस्तप्ते वज्रे च संयुक्तस्यान्त्यहलः प्रागित्त्वं वा भवति । श्लोस्सलिति[4] सल् । न इति[5] णत्वम् । दरिसणं । पक्षे ।

स्वरेभ्यो वक्रादौ ॥ २ ॥ Hē. i, 26.

वक्रादिषु यथादर्शनं प्रथमादिभ्यः स्वरेभ्यः परो बिन्दुर्भवति । रेफलोपः[6] । दंसणं । तु समृद्ध्यादाविति[7] त्वम् । वलोपः[8] । द्वितीयस्वरात्परतो बिन्दुश्च[9] । माणंसिणी ।

णो वातिमुक्तके ॥ ३ ॥ Hē. i, 208.

अतिमुक्तके तवर्गस्य णत्वं वा भवति ।

कामुकयमुनाचामुण्डातिमुक्तके मो ङ्लुक् ॥ ४ ॥ Hē. i, 178.

कामुकादिषु मकारस्य ङानुबन्धो लुग्भवति । ङित्त्वाच्छेषः स्वरः सानुनासिकोच्चारः[10] । कगटड इति[11] संयुक्तककारस्य लुक् । प्रायो लुगित्यन्त्यककारस्य[12] लुक् ।

यश्रुतिः[13] ॥ ५ ॥ Hē. i, 180.

इति यश्रुतित्वम्[13] । तृतीयस्वरात्परतो बिन्दुश्च[14] । अणिउंतअं । अइउंतअं[15] । अणिउत्तअं[16] । अइमुत्तअं । इति च दृश्यते ॥

विस्वासः । वलोपे[17] ।

---

[1] अतिमुत्तं R and T. [2] र्शर्ष° Tri., श्रष° R and T. [3] श्र ष R and T. [4] iv, 29. [5] iv, 47. [6] iv, 32. [7] viii, 8. [8] iv, 32; लोपः R. [9] xii, 2. [10] ii, 6. [11] iv, 45. [12] iv, 26. [13] यश्रुति° Tri.[1] and Tri.[2], यश्रुति° Tri.[3], R, and T. [14] xii, 2. [15] अइउत्तअं R. [16] T om. this word. [17] iv, 32.

Hē. i, 43. **शेर्लुप्तयवरशेर्दिः ॥ ६ ॥**

शषसानां लुप्तयवरशषसानामादेः स्वरस्य दीर्घो भवति । संयोगे उपर्यधोवर्तमानानां यवरशषसानां लोपे सति येऽवशिष्टाः शषसास्तेषामादेरचो दीर्घो भवतीत्यर्थः । शेषादेश इति[1] दित्वे प्राप्ते ।

Hē. ii, 92. **दीर्घान्न ॥ ७ ॥**

लाक्षणिकादलाक्षणिकाच्च दीर्घात्परयोः शेषादेशयोर्द्वित्वं न भवति । वीसासो ॥

तीर्थम् । दुःखम् । दक्षिणः[2] । दीर्घः ।

Hē. ii, 72, 91. **न वा तीर्थदुःखदक्षिणदीर्घे ॥ ८ ॥**

एषु संयुक्तस्य हत्वं न वा भवति ।

Hē. i, 104. **तीर्थे ह्यूल्[3] ॥ ९ ॥**

तीर्थे ईत ऊत्वं भवति । हि[4] । हकारे सति । तूहं । हत्वाभावपक्षे[5] । तित्थं । दुहं । हत्वाभावे । कगटड इति[6] जिह्वामूलीयलोपे । दुक्खं ।

Hē. i, 45. **हे दक्षिणेऽस्य ॥ १० ॥**

दक्षिणशब्दस्यादेरवर्णस्य दीर्घो भवति । हे । चस्य हकारे सति[7] । दाहिणो । पक्षे । च इति[8] खत्वं द्वित्वं च[9] । दक्खिणो ।

Hē. ii, 171. **रो दीर्घात् ॥ ११ ॥**

दीर्घशब्दात्स्वार्थे रो वा भवति । दीहरो । राभावे । दीहो ॥

स्वप्नः ।

Hē. ii, 108. **नात्स्वप्ने ॥ १२ ॥**

स्वप्ने संयुक्तस्य नकारात्प्रागित्त्वं भवति ।

Hē. i, 46. **स्वप्नादाविल् ॥ १३ ॥**

स्वप्नादिष्वादेरवर्णस्य इत्त्वं भवति । सित्तान्नित्यम्[10] । लवरामधश्चेति[11] वलोपः । पो वः[12] ।

---

[1] iv, 4. [2] °णं R and T. [3] ह्यूत् Tri.[1]. [4] T om. हि. [5] °भावे R. [6] iv, 45. [7] xii, 8. [8] viii, 6. [9] iv, 4. [10] ii, 4. [11] iv, 32. [12] iv, 62.

नीवीस्वप्ने वा ॥ १४ ॥ Hē. i, 259.

अनयोर्वस्य मो वा भवति । सिमिणो । सिविणो ॥

अभिज्ञः ।

ज्ञो ञोऽविज्ञाने ॥ १५ ॥ Hē. ii, 83.

ज्ञासंबन्धिनो ञकारस्य लुग्वा भवति । विज्ञानशब्दे[1] न भवति । खघथधभामिति[2] हत्वम् । शेषादेशस्येति[3] ञकारस्य द्वित्वम् । अहिञ्ञो । लुगभावपक्षे ।

ज्ञस्नोः ॥ १६ ॥ Hē. ii, 42.

ज्ञ स्न इत्येतयोर्णत्वं भवति ।

ज्ञो णोऽभिज्ञादौ ॥ १७ ॥ Hē. i, 56.

अभिज्ञादिषु[4] ज्ञकारादेशस्य णस्यावर्णस्य उत्त्वं भवति । अहिणू । ण इति किम् । अहिञ्ञो । अभिज्ञादाविति किम् । प्राज्ञः । पण्णो । पञ्ञो ॥

द्वारम् ।

उत्करवल्लीद्वारमात्वचः ॥ १८ ॥ Hē. i, 58, 79, 81.

उत्करवल्लीद्वारशब्देषु मात्वच्प्रत्यये च आदेरवर्णस्य एत्त्वं तु[5] भवति ।

द्वोर्द्वारे ॥ १९ ॥ Hē. ii, 79.

द्वारे दकारवकारयोः पर्यायेण लुग्भवति ।

वा च्छद्मपद्ममूर्खद्वारे ॥ २० ॥ Hē. ii, 112.

एषु खोरल्यस्य हलः[6] प्रागुत्त्वं वा भवति । देरं । वेरं । वारं । दुवारं ॥

आर्द्रम् ।

वार्द्र उदोत् ॥ २१ ॥ Hē. i, 82.

आर्द्रशब्दे आदेरवर्णस्य उत्त्वमोत्त्वं च वा भवतः ।

---

[1] विज्ञाशब्दे R and T. [2] vi, 4. [3] iv, 4. [4] °ज्ञादौ T. [5] ii, 3. [6] i, 8; °रल्यहलः R.

लो वार्द्रे ॥ २२ ॥

आर्द्रे स्रोर्लत्वं[1] वा भवति। लो ऊ इति[2] ऊत्वम्। उक्कं। ओक्कं। अक्कं। उद्दं। ओद्दं। अद्दं॥

शय्या।

Hē. i, 57.

शय्यादौ ॥ २३ ॥

शय्यादिष्वादेरवर्णस्य एत्त्वं भवति।

Hē. ii, 24.

द्यय्यर्यो जः ॥ २४ ॥

द्य य्य र्य इत्येतेषां जकारो भवति। संयोग इति[3] स्वरूपेण ह्रस्वः। सेज्जा॥

उत्खातः।

Hē. i, 67.

न वाव्ययोत्खातादौ ॥ २५ ॥

अव्ययेषूत्खातादिषु च आदेरातो[4] ह्रस्वो न वा भवति। पूर्वमुपरि वर्गयुज इति[5] द्वित्वेन ककारः। उक्खओ। उक्खाओ॥

प्रस्तावः।

Hē. ii, 45.

स्तः ॥ २६ ॥

स्तकारस्य थो भवति।

Hē. i, 68.

घञि वा ॥ २७ ॥

घञ्निमित्तस्यादिभूतस्याकारस्य[6] ह्रस्वो वा भवति। पत्थवो। पत्थावो। क्वचिन्न भवति। रागः। राओ॥

पानीयम्।

Hē. i, 101.

वा पानीयगे ॥ २८ ॥

पानीयादिष्वादेरीकारस्य इत्त्वं वा भवति। पाणिअं। पाणीअं॥

युधिष्ठिरः।

---

[1] i, 8. [2] iv, 63. [3] iv, 25. [4] आदेरतो R and T. [5] iv, 5. [6] Pā. iii, 3, 27.

उ युधिष्ठिरे[1] ॥ २९ ॥ Hē. i, 96.

युधिष्ठिरे आदेरित उत्वं वा भवति।

मुकुलादौ ॥ ३० ॥ Hē. i, 107.

मुकुलादिष्वादेरुकारस्य अत्वं भवति । खघथधभामिति[2] हत्वम् । कगटडेति[3] षकारलोपः।

हरिद्रादौ ॥ ३१ ॥ Hē. i, 254.

हरिद्रादिषु रस्य लत्वं भवति। जुङ्गट्ठिओ। जङ्गट्ठिओ। जुहिट्ठिओ॥ उच्छ्वासः। उत्सवः।

दोदोऽनुत्साहोत्सन्न[4] ऊ शसि ॥ ३२ ॥ Hē. i, 114.

शकारसकारयोः परयोरुदित्युपसर्गस्य दकारेण सह ऊत्वं भवति। उत्साहोत्सन्नशब्दौ वर्जयित्वा। ऊसासो। ऊसवो॥

पुष्करम्।

ष्कस्कोर्नाम्नि ॥ ३३ ॥ Hē. ii, 4.

ष्क स्क इत्येतयोर्नाम्नि संज्ञायां खो भवति।

स्तौ ॥ ३४ ॥ Hē. i, 116.

संयुक्ते परे आदेरत ओत्वं भवति। पोक्खरं॥

बृहस्पतिः।

तु बृहस्पतौ ॥ ३५ ॥ Hē. i, 138.

बृहस्पतौ ऋत इदुतौ तु[5] भवतः।

भ्यौ[6] बृहस्पतौ तु बहीः ॥ ३६ ॥ Hē. ii, 137.

बृहस्पतौ बकारहकारयोर्यथासंख्यं भकारयकारौ[7] तु[5] भवतः।

श्लेष्मबृहस्पतौ तु फोः ॥ ३७ ॥ Hē. ii, 55.

अनयोः फोर्द्वितीयस्य संयुक्तस्य[8] फो भवति तु[5]।

---

[1] उयुधि° Tri.[1] [2] vi, 4. [3] iv, 45. [4] दोदोऽ Tri., उदोदोऽ R and T. [5] ii, 3. [6] Thus Tri.[3]; ह्यौ all other MSS. [7] हकार° R and T. [8] T om. this word.

Hē. ii, 69.

सो बृहस्पतिवनस्पत्योः ॥ ३८ ॥

अनयोः संयुक्तस्य सकारस्तु[1] भवति। बिहप्फई। बुहप्फई। बहप्फई। बिहस्सई। बुहस्सई। बहस्सई। भअप्फई[2]। भअस्सई[2]। आदेशाभावे कगटडेति[3] सलोपः। बिहप्पई। बुहप्पई। भअप्पई[2]। बहप्पई। इति द्वादश भिदाः ॥

आवृतः।

Hē. i, 143.

ढिरावृते[4] ॥ ३९ ॥

आवृते ऋतो ढिरादेशो भवति। कगटडेति[5] दलोपः। दीर्घान्नेति[6] द्वित्वप्रतिषेधः। आढिओ ॥

वृन्नः।

Hē. i, 144.

वृन्ने ऽरिः[7] प्रा ॥ ४० ॥

वृन्ने ऋतः पकारतकाराभ्यां सह अरि इत्यादेशो भवति। वरिओ ॥

ऋद्धिः।

Hē. i, 140.

केवलस्य रिः[8] ॥ ४१ ॥

केवलस्य व्यञ्जनेनासंपृक्तस्य ऋतो रिर्भवति। रिद्धी ॥

सदृग्नः। सदृक्षः। सदृक्।

Hē. i, 142.

दृशि टक्सक्क्षिपि[9] ॥ ४२ ॥

टक् सक्[10] क्षिप् इत्येतदन्ते दृशि धातौ ऋतो रित्वं भवति। पूर्वव्याकरणप्रक्रियया[11] टक् सक्[12] क्षिबिति व्यवहारः। अह्र इति[13] निषेधात् द्वित्वाभावः। सरिसो। स्पृहादित्वाच्छत्वम्[14]। सरिच्छो। अन्त्यलोपः[15]। सरी ॥

युष्मादृग्नः।

Hē. i, 246.

अर्थपरे तो युष्मदि ॥ ४३ ॥

अर्थपरे युष्मच्छब्दे यस्य तकारो भवति।

---

[1] ii, 3. [2] हअ° R and T. [3] iv, 45. [4] ढि आवृते R. [5] iv, 45. [6] xii, 7. [7] रि Tri. [8] T om. this Sūtra. [9] स for सक् R and T; °क्षिनि Tri.[2a] and Tri.[3]—See Pischel on Hē. i, 142. [10] स R and T. [11] °प्रतीत्या T. [12] स R and T. [13] iv, 4. [14] iv, 2. [15] vii, 2.

श्मष्मस्मह्मामस्मरश्मो म्हः ॥ ४४ ॥ Hē. ii, 74.

श्म ष्म स्म ह्म इत्येतेषां म्ह इत्यादेशो भवति। स्मरश्मिशब्दयोर्न भवति। तुम्हारिसो ॥

दैत्यः।

दैत्यादौ ॥ ४५ ॥ Hē. i, 151.

दैत्यादिष्वादेरच अइ इत्यादेशो भवति।

त्योऽचैत्ये ॥ ४६ ॥ Hē. ii, 13.

चैत्यवर्जिते त्यस्य चो भवति। दच्चो ॥

धैर्यम्।

ई धैर्ये ॥ ४७ ॥ Hē. i, 155.

धैर्ये एच ईत्वं भवति।

धैर्ये रः ॥ ४८ ॥ Hē. ii, 64.

धैर्ये र्यस्य रो वा भवति। धीरं। वय्यर्यो ज इति[1] जत्वम्। धिज्जं ॥

चयोदश। अष्टादश। चयोविंशतिः।

एत्साञ्झला चयोदशगेऽचः ॥ ४९ ॥ Hē. i, 165.

चयोदशादिष्वादेरचः साच्चेन परेण हला सह एत्वं भवति।

रल् सप्तत्यादौ ॥ ५० ॥ Hē. i, 210.

सप्तत्यादौ तवर्गस्य रत्वं भवति। लिक्त्वान्नित्यम्[2]।

प्रत्यूषदिवसदशपाषाणे तु हः ॥ ५१ ॥ Hē. i, 262, 263; ii, 14

प्रत्यूषादिषु शषसानां हकारस्तु[3] भवति। तेरह[4]। तेरस।

ष्टः ॥ ५२ ॥ Hē. ii, 34.

ष्टस्य ठो भवति। अट्ठारह। अट्ठारस।

---

[1] xii, 24. [2] ii, 4. [3] ii, 3. [4] तेरहो R and T.

Hē. i, 28, 92. **विंशतिषु त्या स्रोपल् ॥ ५३ ॥**

विंशतिप्रकारेषु ति इत्यवयवेन सह त्रिन्दोः ग्रिञ्चिच[1] स्रोपो भवति। ग्रित्त्वात्पूर्वस्य दीर्घः[2]। अदन्तत्वात् टाप्[3]। तेवीसा ॥

स्फटिकः।

Hē. i, 197. **स्फटिके[4] ॥ ५४ ॥**

स्फटिके टवर्गस्य स्रो[5] भवति।

Hē. i, 186. **निकषस्फटिकचिकुरेषु हः ॥ ५५ ॥**

एषु कवर्गस्य हत्वं भवति। फळिहो ॥

भटः।

Hē. i, 195. **टो डः ॥ ५६ ॥**

असंयुक्तस्यादौ स्थितस्याचः परस्य टकारस्य डत्वं भवति। भडो ॥

पञ्चदश। पञ्चाशत्। दत्तः[6]।

Hē. ii, 43. **पञ्चदशदत्तपञ्चाशति णः ॥ ५७ ॥**

एषु स्रोर्णकारो[7] भवति। पण्णरस। अक्तलोपः[8]। पण्णासा। स्वप्नादाविलितीत्त्वम्[9]। दिण्णो ॥

मन्मथः।

Hē. i, 242. **मन्मथे ॥ ५८ ॥**

मन्मथे आदेर्मस्य वो भवति।

Hē. ii, 61. **न्मो मः ॥ ५९ ॥**

न्मस्य मो भवति। वम्महो ॥

ललाटम्।

Hē. i, 257. **लो ललाटे च ॥ ६० ॥**

ललाटे आदेर्लकारस्य णो भवति।

[1] ii, 4. [2] ii, 5. [3] Pā. iv, 1, 4. [4] R and T om. this Sūtra (Tri. i, 3, 25). [5] ळो R and T. [6] दत्तं R and T. [7] i, 8. [8] T om. this word; vii, 2. [9] xii, 13.

पक्काङ्गारललाटे तु ॥ ६१ ॥ Hē. i, 47.

एष्वादेरस्य इत्वं तु[1] भवति । टो ड इति[2] डत्वम् ।

ललाटे डलोः[3] ॥ ६२ ॥ Hē. ii, 123.

ललाटे डलयोर्व्यत्ययो[4] भवति । णिडाळं । णडाळं ॥

स्थूलः[5] ।

स्थूले रलूतश्चीत् ॥ ६३ ॥ Hē. i, 124, 255.

स्थूले लस्य लिद्रूपं[6] भवति । तत्संनियोगेन च ऊत ओत्वं भवति । थोरो ॥

स्नुषा ।

स्नुषायां[7] णहः फोः ॥ ६४ ॥ Hē. i, 261.

स्नुषाशब्दे फोर्द्वितीयस्य शो:[8] णह इत्यादेशस्तु[9] भवति । मनयामिति[10] नकारलोपः । सुण्हा । सुसा ॥

विन्ध्यः । ग्राह्यम् ।

ध्यह्योर्झल् ॥ ६५ ॥ Hē. ii, 26.

ध ह्य इत्येतयोर्झित्[11] झत्वं भवति । हलि ङत्रणनामिति[12] बिन्दुः । वर्गेऽन्त्य इति त्रत्वम्[13] । विञ्झो[14] । पक्षे बिन्दुरेव । विंझो[15] ॥

वर्तुलम् ।

र्तस्याधूर्तादौ टः ॥ ६६ ॥ Hē. ii, 30.

र्तस्य टो भवति । धूर्तादौ न । वट्टुळं । अधूर्तादाविति किम् । धुत्तो ॥

मन्युः । चिह्नम् ।

[1] ii, 3. [2] xii, 56. [3] **डलो**: Tri., **डळ्ळो**: R and T.
[4] **डळयो°** R and T. [5] **स्थूलं** R and T. [6] ii, 4.
[7] **°यां** Tri., **°या** R and T. [8] i, 4. [9] ii, 3. [10] iv, 48.
[11] ii, 4. [12] vi, 5. [13] vi, 6; **ऽन्त्यादाविति त्वं** R and T.
[14] **वज्झो** R and T. [15] The Prākṛit form of **ग्राह्यम्** is missing.

Hē. ii, 44, 50.

वा न्तन्थौ मन्युचिह्नयोः ॥ ६७ ॥

अनयोर्यथासंख्यं संयुक्तयोः[1] न्त न्थ इत्येतौ वा भवतः । मंतू । मसू । चिंधं । बाङ्गलकादादेरपि चकारस्य प्रायो लुगिति[2] लुकि । इंधं । पचे । भ्रमणस्वरूपलक्षणा[3] गह इति[4] गहादेशः । चिण्हं ॥

पुप्फम् । स्पन्दनम् ।

Hē. ii, 53.

प्पस्पोः फः ॥ ६८ ॥

प्प स्प इत्येतयोः फो भवति । पुप्फं । फंदणं ॥

ब्रह्मचर्यम् । आचार्यः । सौन्दर्यम् ।

Hē. ii, 107.

स्याङ्भव्यचैत्यचौर्यसमे यात् ॥ ६९ ॥

स्यात् भव्य चैत्य इत्येतेषु चौर्यसमेषु च संयुक्तस्य यकारात्परागित्त्वं भवति । भ्रमष्मस्मन्नामिति[5] म्हादेशः । बम्हचरिअं ।

Hē. i, 160.

शौण्डगे[6] ॥ ७० ॥

शौण्डादिभ्यादेरेच[7] उत्त्वं भवति । सुंदरिअं ।

Hē. i, 59; ii, 63.

डेरो ब्रह्मचर्यसौन्दर्ये च ॥ ७१ ॥

ब्रह्मचर्यसौन्दर्ययोश्चकारादाचार्ये च र्यस्य डिदेर[8] इति भवति । बम्हचेरं । सुंदेरं ।

Hē. i, 73.

आचार्ये चो हश्च ॥ ७२ ॥

आचार्ये चकारसंबन्धिन आतो ह्रस्वो भवति । चकारादित्त्वं च । आअरिओ । आइरिओ ॥

पर्यन्तः ।

Hē. i, 58; ii, 65.

वा पर्यन्ते ॥ ७३ ॥

पर्यन्ते र्यस्य डेरो वा भवति । पेरंतो । पज्जंतो । वाक्यपरि[9]समाप्तौ अः । पज्जंतो ॥

आश्चर्यम् ।

[1] T om. this word. [2] iv, 26. [3] R and T om. ह्ल. [4] v, 1. [5] xii, 44. [6] Thus Tri.[3], शौण्डगेषु Tri.[1] and Tri.[2], शौण्डागेदिषु R and T; T adds च. [7] °देरच T. [8] iv, 7. [9] xii, 24.

अरीअरिज्जमाश्चर्ये[1] ॥ ७४ ॥ Hē. ii, 67.

आश्चर्ये यस्य अर रीअ[1] रिज्ज[2] इत्यादेशा भवन्ति। अश्चर्यमिति[3] छत्वम्[4]। अच्छअरं। अच्छरीअं[5]। अच्छरिज्जं। डेरो ब्रह्मचर्येति[6] डेरादेशे। अच्छेरं। चोर्यसमत्वात्[7]। अच्छरिअं॥

आश्लिष्टः।

आश्लिष्टे लधौ ॥ ७५ ॥ Hē. ii, 49.

आश्लिष्टे संयुक्तयोर्यथासंख्यं लधौ भवतः। आळिद्धो॥

स्तब्धः।

ठढौ स्तब्धे ॥ ७६ ॥ Hē. ii, 39.

स्तब्धे संयुक्तयोर्यथासंख्यं ठढौ भवतः[8]। ठड्ढो॥

आरब्धः[9]।

तो ढो रश्चारब्धे तु[10] ॥ ७७ ॥ Hē. ii, 138.

आरब्धे संयुक्तस्य तकारो भवति। तत्संनियोगेन रस्य च ढः। आढत्तो। ववयोरभेदाच्चवरामिति[11] लुक्। आरद्धो॥

प्रेम। स्रोतः। यौवनम्।

तैलादौ ॥ ७८ ॥ Hē. ii, 98.

तैलादिषु यथादर्शनमन्त्यस्यानन्त्यस्य च हलो द्वित्वं भवति। तेल्लं। पेम्मं। सोत्तं। ऐच एइ[12]। आदेर्जः[13]। जोव्वणं॥

क्ष्मा। रत्नम्।

क्ष्मारत्नेऽन्त्यहलः ॥ ७९ ॥ Hē. ii, 101.

क्ष्मारत्नशब्दयोः संयुक्तस्यान्त्यहलः प्रागत्वं भवति।

---

[1] रीअ Tri.[1], रिअ Tri.[2], Tri.[3], R, and T. [2] रिज्जं R and T.
[3] viii, 11. [4] छल्लं R and T. [5] अच्छरिअं R and T.
[6] xii, 71. [7] xii, 69. [8] स्तः T. [9] R and T om. this word.
[10] ii, 3. [11] iv, 32. [12] v, 17. [13] vii, 33.

Hē. ii, 18. **क्ष्मायां कौ ॥ ८० ॥**

पृथिव्यां वर्तमाने क्ष्माशब्दे[1] क्षोः[2] छो भवति । छमा । रअणं ॥ शेषः । क्षानम् ।

Hē. ii, 106. **लादक्लीबेषु[3] ॥ ८१ ॥**

संयुक्तस्य लकारात्परागित्त्वं भवति । क्लीवप्रकारेषु[4] न । सिळेसो । मिळाणं । अक्लीबेष्विति[4] किम् । क्लीबः[4]। कोमो[5]। ववयोरभेदात्प्राप्तो लुगिति[6] वकारलोपः ॥

स्निग्धम् ।

Hē. ii, 109. **स्निग्धे त्वदितौ[7] ॥ ८२ ॥**

स्निग्धे संयुक्तस्य नात्परागत्त्वमित्त्वं च भवतः । सणिद्धं । सिणिद्धं । पचे । णिद्धं ॥

स्नेहः । स्नेहाग्न्योर्वेत्यत्त्वम्[8] । सणेहो । पचे । णेहो ॥

कृष्णः ।

Hē. ii, 110. **कृष्णे वर्णे ॥ ८३ ॥**

वर्णवाचिनि कृष्णशब्दे संयुक्तस्यान्त्यहलः प्रागदितौ तु[9] भवतः । कसणो । कसिणो । कण्हो । वर्ण इति किम् । कण्हो । विष्णुः ॥

आलानम्[10] ।

Hē. ii, 117. **लनोरालाने[11] ॥ ८४ ॥**

आलाने[12] लकारनकारयोर्ण्यत्वयो भवति । आणाळं ॥

हरिद्रा । छाया । हरिद्रादाविति[13] लत्वम् ।

Hē. i, 88. **मूषिकविभीतकहरिद्रापथिपृथिवीप्रतिश्रुत्यत् ॥ ८५ ॥**

मूषिकादिष्वादेरिकारस्याकारो भवति । रेफलोपः[14] ।

Hē. iii, 34. **हरिद्राच्छाये ॥ ८६ ॥**

अनयोर्ङीप् वा भवति । हळद्दी । हळद्दा ।

---

[1] वर्तमानस्य क्ष्माशब्दस्य T. [2] i, 8. [3] Thus Tri.[2a] and Tri.[3]; °क्लबेषु all other MSS. [4] क्लब for क्लीब R and T. [5] कओ R and T. [6] iv, 26. [7] ii, 3. [8] iv, 46; स्नेहाग्नी चेत्यत्वं R and T. [9] ii, 3. [10] आळानं R. [11] ळनो° Tri.[1] and R, ळणो° T; °राळाने Tri.[1], Tri.[2], and R, °राळाणे T. [12] आळाने R, आळाणे ळकारणकार° T. [13] xii, 31. [14] iv, 32.

छायायां होऽकान्तौ ॥ ८७ ॥ Hē. i, 249.

छायाशब्दे यस्य हत्वं तु[1] भवति । कान्तौ[2] न । छाही[3] । छाहा । छाई । छाआ । अकान्ताविति किम् । मुहच्छाआ । मुखशोभेत्यर्थः ॥

कुच्चरी ।

प्रत्यये ॥ ८८ ॥ Hē. iii, 31.

टिदादिप्रत्ययान्तविहितो ङीविह[4] वा भवति । कुच्चरी । पक्षे विकल्पसामर्थ्यादेव टापि[5] । कुच्चरा ॥

शतृशानचन्तयोर्भेदः । हसे हसने । षह मर्षणे । हस् अत । सह आन । इति स्थिते ।

शतृशानचः[6] ॥ ८९ ॥ Hē. iii, 181.

शतृशानचोर्माण न्त इत्येतौ प्रत्येकं भवतः ।

हलोऽक् ॥ ९० ॥ Hē. iv, 239.

हलन्तस्य धातोरगागमो भवति ।

वा लड्लोट्छतृषु[7] ॥ ९१ ॥ Hē. iii, 158.

लट्लोट्शतृषु[8] परतोऽत एत्वं वा भवति । हसेंतो । हसंतो । हसेमाणो । हसमाणो । सहेंतो । सहंतो । सहेमाणो । सहमाणो । स्त्रियां तु ।

स्त्रियामी च ॥ ९२ ॥ Hē. iii, 182.

स्त्रियां शतृशानचोः स्थाने ईत्वं चकारात् माण न्त इत्येतौ च भवन्ति । हसई । पुंसोऽजातेर्ङीर्ब्वेति[9] ङीप् । हसमाणी । हसेमाणी । हसंती । हसेंती । पक्षे । हसमाणा । हसंता । अप्राप्ते विभाषात्वाच्छचा-देशमाणन्ताभ्यामियं विभाषा न भवति । तच स्थानिवद्भावेनोगित्त्वात्[10] उगितश्चेति[11] प्राप्तो ङीप्प्रत्ययः प्रत्यय इति सूत्रेण[12] विकल्पेन

---

[1] ii, 3. [2] T adds तु. [3] xii, 86; छाहं R and T.
[4] Pā. iv, 1, 15. [5] Pā. iv, 1, 4. [6] °शानचः Tri., °शानचोः R and T. [7] लड्° Tri.[3], लट्° Tri.[1], Tri.[2], R, and T. [8] °च्छतृषु R.
[9] viii, 4. [10] Pā. i, 1, 56. [11] Pā. iv, 1, 6. [12] xii, 88.

भवतीत्याङ्ः । हसेंती । हसंती । हसेमाणी । हसमाणी । हसेंता । हसंता । हसेमाणा । हसमाणा ॥

पतिगृहम् । वेणुवनम् । यमुनातटम् । वधूमुखम् ।

Hē. ii, 144.

अपतौ घरो गृहस्य ॥ ९३ ॥

गृहस्य घर इति वा भवति । पतिशब्दो न चेत्परः ।

Hē. i, 4.

दिहौ मिथस्से ॥ ९४ ॥

से समासे[1] दीर्घह्रस्वौ अन्योन्यस्य बहुलं भवतः । पईघरं । पइघरं । वेणूवणं[2] । वेणुवणं[2] । कामुकयमुनेति[3] लुक् । समुदायापेक्षयानादित्वात्प्रायो लुगिति[4] तकारस्य लुक् । जउणाअडं । जउणअडं । वहूमुहं । वहुमुहं ॥

कुसुमप्रकरः । आलानस्तम्भः ।

Hē. ii, 8.

स्तम्भे ॥ ९५ ॥

स्तम्भे स्तोः संयुक्तस्य खकारस्तु[5] भवति । हलि ङञणनामिति[6] मकारस्य बिन्दुः । खंभो । पक्षे । स्त इति[7] थत्वम् । थंभो ।

Hē. ii, 97.

वा से ॥ ९६ ॥

से समासे शेषादेशयोर्द्वित्वं वा भवति । कुसुमप्पअरो । कुसुमपअरो । आणाळक्खंभो[8] । आणाळत्थंभो ॥

प्रमुक्तः । परवशः ।

Hē. ii, 2.

कश्शक्तमुक्तदृष्टमृदुत्वरुग्णेषु ॥ ९७ ॥

एषु स्तोः[9] ककारो वा भवति ।

प्रमुक्तगे ॥ ९८ ॥

प्रमुक्तादौ समासे यथादर्शनं व्यञ्जनस्य द्वित्वं वा भवति । पम्मुक्को । पमुक्को । पम्मुत्तो । पमुत्तो । परव्वसो[10] । परवसो ॥

एकम् एकम् । एकेन एकेन । एकं बहुव्रीहिवदिति[11] बहुव्रीहिवद्भावेन नित्यं सुपो लुकि[12] प्राप्ते ।

---

[1] Tri. i, 1, 8. [2] °वनं R. [3] xii, 4. [4] iv, 26. [5] ii, 3. [6] vi, 5; but this rule does not include म. [7] xii, 26. [8] xii, 84. [9] i, 8. [10] परवस्सो T. [11] Pā. viii, 1, 9. [12] Pā. ii, 4, 71.

वीप्सार्थात्तदचि सुपो मस्तु ॥ ९९ ॥ Hē. iii, 1.

वीप्सार्थात्पदात्परस्य सुपः स्थाने तदचि वीप्सार्थसंबन्धिन्यचि परे मस्तु[1] भवति। एकमेकं। एकमेकेण। पक्षे सुपो लुकि[2] लोप इत्यकारलोपे[3] च। एक्केक्कं[4]। इत्यादि। समासे तु वाक्यविभक्त्यपेक्षया अन्यत्वानन्यत्वयोरुभयोरपि संभवादन्यलोपस्य[5] भावाभावौ प्रयोगतोऽनुसर्तव्यौ। यथा। सज्जनः। सज्जणो। सज्जणो। सज्जिणः। सज्भिक्खू। सभिक्खू। तगुणाः[6]। तग्गुणा। तगुणा। इत्यादि। सद्धा। उग्गअं। इत्यत्र तु अग्रदुदोति[7] निषेधः। तच च[8] बाहुलकान्नित्यमेव संधिः॥

निस्सहः। दुस्सहः।

निर्दुरि वा ॥ १०० ॥ Hē. i, 13.

निर्दुरोरन्त्यहलो लोपो वा भवति। णिसहो।

दुरो रलुकि तु ॥ १०१ ॥ Hē. i, 115.

दुरो रेफलोपे सति आदेरुत ऊत्वं तु[9] भवति। दूसहो। दुसहो। अन्त्यलोपाभावे कगटडेति[10] सलोपे शोर्लुप्तयवरशोर्दीरिति[11] दीर्घे। णीसहो। दूसहो। बाहुलकात्सलोपाभावे। णिस्सहो। दुस्सहो॥

मन्तमणवन्तमाआलुआलइरइल्लउल्लइत्ता[12] मतुपः॥ १०२ ॥ Hē. ii, 159.

मतुप्प्रत्ययस्य मन्ताद्यादेशा यथाप्रयोगं भवन्ति। पुण्णमंतो। धणमणो। भत्तिवंतो। हणुमा। णेहाळू। लोप इति[13] लोपः। जडाळो। गव्हिरो। सोहिळ्ळो। दप्पुळ्ळो[14]। माणइत्तो[15]। अत्र लोपो बाहुलकान्न भवति॥

एतावत्। यावत्। तावत्। इयत्। कियत्।

वतुपो[16] डित्तिअ एतल्लुक् चैतद्यत्तदः ॥ १०३ ॥ Hē. ii, 156.

एतद्यत्तद्भ्यः परस्य वतुपो डित्[17] इत्तिअ इति भवति। एतदो लुक् च। एतावत्। इत्तिअं। यावत्। जित्तिअं। तावत्। तित्तिअं।

---

[1] ii, 3. [2] Pā. ii, 4, 71. [3] iii, 7. [4] एक्कक्कं R and T. [5] vii, 2. [6] तग्गुणा T. [7] vii, 2. [8] T om. च. [9] ii, 3. [10] iv, 45. [11] xii, 6. [12] °आलुआल° Tri., °आळुआळ° R and T; °इळ्ळ° T; °इत्ता Tri.², °इंता Tri.¹, Tri.³, R, and T. [13] iii, 7. [14] दप्पिळ्ळो R. [15] °इंतो R and T. [16] मतुपो Tri.¹ [17] iv, 7.

Hē. ii, 157. **किमिदम्भ्यामेतद्यत्तद्भ्यश्च परस्य वतुपो डित एत्तिअ एत्तिल एद्दह इत्यादेशा भवन्ति । एतल्लुक् च । केत्तिअं । कित्तिलं । केद्दहं । एत्तिअं । इत्तिलं । एद्दहं । एत्तिअं । इत्तिलं । एद्दहं । जेत्तिअं । जित्तिलं । जेद्दहं । तित्तिअं । तेत्तिअं । तित्तिलं । तेद्दहं ॥**

युष्मदीयः ।

Hē. ii, 147. **केर इदमर्थे ॥ १०५ ॥**

इदमर्थे विहितस्य छप्रत्ययस्य केरो भवति । अर्थपर इति तकारः । तुम्हकेरो ॥

पोनत्वम् ।

Hē. ii, 154. **त्वस्य तु डिमात्तणौ ॥ १०६ ॥**

त्वप्रत्ययस्य डित इमा त्तण इत्येतौ तु भवतः । पीणिमा । पीणत्तणं । पच्चे । पीणत्तं । त्वस्येति किम् । पीणआ । पीणदा ॥

चन्द्रः ।

Hē. ii, 164. **स्वार्थे तु कश्च ॥ १०७ ॥**

स्वार्थे कप्रत्ययस्तु भवति । ककारोच्चारणं पैशाचिकभाषार्थम् । चंदओ ॥

हसिता ।

Hē. ii, 145. **इरश्शीलाद्यर्थस्य ॥ १०८ ॥**

शीलधर्मसाध्वर्थविहितस्य तृनादेः प्रत्ययस्य इर इति भवति । हसनशीलः । हसिरो ॥

Hē. iii, 132 **तादर्थ्ये ङेस्तु ॥ १०९ ॥**

तादर्थ्ये ङेः सस्तु भवति । देवस्स । देवाय । देवार्थमित्यर्थः ॥

---

[1] °डेद्दहं Tri., °डोद्दह R and T. [2] R and T om. च. [3] iv, 7. [4] एत्तिह R and T. [5] एत्तअं R. [6] T om. these three words. [7] जत्तिअं R and T. [8] xii, 103. [9] Pā. iv, 3, 120. [10] Thus Tri.[1] and Tri.[3]; Tri.[2], R, and T om. छ; Pā. iv, 3, 1. [11] xii, 43. [12] iv, 7. [13] ii, 3. [14] xx, 4. [15] Pā. iii, 2, 135. [16] iv, 18; ii, 3. [17] देवस्सं R and T.

Thirteenth Section.

अथाव्ययविभागः ॥

पुनर्[1] ।

शिष्टुङ्नपुनरि तु ॥ १ ॥ Hē. i, 65.

नपुनरशब्दे[2] अन्त्यहलः शिदिकारो[3] लुक् च तु[4] भवति । णउणाइ । णउणा । पचे । णउण । णउणो इति तु सिद्धावस्थायामतो ङो विसर्ग इति[5] ङोआदेशे द्रष्टव्यम् । पुणाइ इति च दृश्यते ॥

उपरि ।

त्वदुत उपरिगुरुके ॥ २ ॥ Hē. i, 108, 109.

उपरिगुरुकयोरादेरुकारस्य अत्तं तु[4] भवति । स्वरेभ्यो वक्रादाविति[6] बिन्दुः । अवरिं । उवरिं[7] ॥

यथा । तथा । अथवा । न वाव्ययोत्खातादाविति[8] ह्रस्वः । अह । अहा । तह । तहा । अहव । अहवा ॥

सदा ।

इत्तु सदादौ ॥ ३ ॥ Hē. i, 72.

सदादिष्वादेराकारस्य इत्तं तु[4] भवति । सइ । सआ ॥

इति भणितम् ।

इतौ तो वाक्यादौ ॥ ४ ॥ Hē. i, 91.

वाक्यादिभूते इतिशब्दे तकारसंबन्धिन इत अत्वं भवति । इअ भणिअं ॥

यावत् । तावत् ।

एवमेवदेवकुलप्रावारकयावज्जीवितावटावर्तमानतावति वः ॥ ५ ॥ Hē. i, 271.

एवमेवादिष्वन्तर्वर्तमानस्य वकारस्याचा सहितस्य[9] लुग्वा भवति । अन्त्यलोपः[10] । जा । जाव । ता । ताव ॥

इदानीम् ।

---

[1] T om. this word. [2] R and T om. न. [3] ii, 5. [4] ii, 3. [5] vii, 28. [6] xii, 2. [7] अपरि । उपरि T. [8] xii, 25. [9] °स्याच्सहितस्य T. [10] T om. this word; vii, 2.

Hē. ii, 134. **एण्हिंएत्ताहे इदानीमः ॥ ६ ॥**

इदानीमित्यस्य एण्हिं एत्ताहे इति वा भवतः । एण्हिं । एत्ताहे । पक्षे बिन्दौ[1] । स्वरस्य बिन्दुमोति[2] ह्रस्वः । इआणिं[3] ।

कुच ।

Hē. ii, 161. **हिन्थहास्तलः[4] ॥ ७ ॥**

चलो हि त्थ ह इति चयो भवन्ति । चतसि च किमो स्क इति[5] कादेशः । कहिं[6] । कत्थ । कह ॥

मथुरावत्[7] ।

Hē. ii, 150. **वं वतेः ॥ ८ ॥**

वतेः वं इत्यादेशो भवति । बाऽलक्षादादेरपि रेफस्येत्संज्ञा[8] । मऊरव्व ॥

सर्वतः ।

Hē. ii, 160. **दोत्तो तसः ॥ ९ ॥**

तस्प्रत्ययस्य दो त्तो इत्येतौ तु[9] भवतः । सव्वदो । सव्वत्तो । पक्षे । अतो डो विसर्ग इति[10] डोआदेशः । सव्वओ ॥

शृतक्षत्वः ।

Hē. ii, 158. **स्नुत्तं कृत्वसः ॥ १० ॥**

क्षत्वसुचो लाघवन्धो[11] कृत्तमिति भवति । सअकृत्तं ॥

शृनैः ।

Hē. ii, 168. **शनैसो डिअं[12] ॥ ११ ॥**

शृनैश्शब्दात्स्वार्थे डित्[13] इअं इति भवति । सणिअं ॥

मनाक् ।

Hē. ii, 169. **मनाको डअं च वा ॥ १२ ॥**

मनाक्शब्दात्स्वार्थे डित्[13] अअं इअं च[14] वा[15] भवतः । मणअं । मणिअं । मणा[16] ।

---

[1] iii, 10. [2] v, 5. [3] इआणी R, इत्तणिं T. [4] हिं° T. [5] vii, 4. [6] कहिं R and T. [7] मधुरावत् R and T. [8] iv, 19. [9] ii, 3. [10] vii, 28. [11] ii, 4. [12] स्नडिअं Tri.[1] and Tri.[3] [13] iv, 7. [14] T om. च. [15] R om. वा. [16] T om. this word.

अभ्युपगमे आम[1] ॥ १३ ॥ Hē. ii, 177.

अभ्युपगमे आम[1] इत्यव्ययं प्रयोक्तव्यम् ॥

तं वाक्योपन्यासे ॥ १४ ॥ Hē. ii, 176.

तं इत्यव्ययं वाक्योपन्यासे प्रयोज्यम् ॥

णइचेअचिअच्च[2] **एवार्थे** ॥ १५ ॥ Hē. ii, 184.

अवधारणार्थे[3] णइ चेअ चिअ च्च[4] इति चत्वारः प्रयोज्याः[5] ॥

हद्धि[6] **निर्वेदे** ॥ १६ ॥ Hē. ii, 192.

निर्वेदे हद्धीति प्रयोज्यम् ॥

मिवपिवविवविअवव इवार्थे ॥ १७ ॥ Hē. ii, 182.

इवार्थे[7] मिव पिव विव विअ व व इति षट् वा[8] प्रयोज्याः ॥

किरइरहिर किलार्थे ॥ १८ ॥ Hē. ii, 186.

किर इर हिर इति किलार्थे वा प्रयोज्याः ॥

अम्मो[9] **आश्चर्ये** ॥ १९ ॥ Hē. ii, 208.

अम्मो इत्याश्चर्ये प्रयोज्यम् ॥

आनन्तर्ये णवरिअ[10] ॥ २० ॥ Hē. ii, 188.

णवरिअ इत्यानन्तर्ये प्रयोज्यम् ॥

केवले णवर[11] ॥ २१ ॥ Hē. ii, 187.

केवलेऽर्थे णवर इति प्रयोज्यम् ॥

वा सख्या मामिहळाहळे[12] ॥ २२ ॥ Hē. ii, 195.

सख्या आमन्त्रणे[13] मामि हळा हळे इति वा प्रयोज्यम् ॥

---

[1] **आम** Tri.[1] and T. [2] **°च्च** Tri., **°च्छ** R and T. [3] **°णेऽर्थे** R. [4] **च्छ** R and T. [5] **प्रयोक्तव्याः** T. [6] **हद्धी** Hē. ii, 192. [7] T om. this word. [8] T om. **वा**. [9] **अंहो** Tri.[3], **अम्हो** Tri.[2a] and T. [10] **णवरि** Tri.[1] [11] T om. this Sūtra. [12] **°हलाहळे** Tri.[2a] and Tri.[3] [13] **सख्यामन्त्रणे** T.

Hē. ii, 196. **दे संमुखीकरणे च ॥ २३ ॥**

संमुखीकरणे चकारात्सख्या आमन्त्रणे च दे इति प्रयोज्यम् ॥

Hē. ii, 190. **अणणाइं नञर्थे ॥ २४ ॥**

नञर्थे अण णाइं इति प्रयोज्यम् ॥

Hē. ii, 207. **मणे[1] विमर्शे ॥ २५ ॥**

विमर्शे मणे इति प्रयोज्यम् ॥

Hē. ii, 191. **माइ[2] मार्थे ॥ २६ ॥**

माइ इति मार्थे प्रयोज्यम् ॥

Hē. ii, 183. **लक्षणे जेणतेण ॥ २७ ॥**

जेण तेण इत्येतौ लक्षणे प्रयोज्यौ ॥

Hē. i, 172. **त्वोऽवापोताः[3] ॥ २८ ॥**

अव अप उत इत्येते ओ इति तु[4] प्रयोज्याः। ओआरो। अवतारः अपकारो[5] वा। ओ विरएमि। उत विरचयामि[6]। पचे[7]। अवआरो। इत्यादि ॥ प्रत्येकम् ।

Hē. ii, 210. **प्रत्येकमः पाडिएक्कंपाडिक्कं[8] ॥ २९ ॥**

पाडिएक्कं[9] । पाडिक्कं ॥

Hē. ii, 212. **इहरा इतरथा ॥ ३० ॥**

Hē. ii, 211. **उअ[10] पश्य ॥ ३१ ॥**

उअह[11] इति च दृश्यते ॥

इति सकलविद्याविशारदस्य समुद्रबन्धयज्वनः सूनुना
सिंहराजनामधेयेन विरचिते प्राकृतरूपावतारे
प्राकृतभाषायां सुबन्तविभागः समाप्तः ॥

---

[1] **मणे** Tri. [2] **माइं** Hē. ii, 191. [3] **त्वोद्वा°** Tri.[2] and Tri.[3]; **°पोताः** Tri.[1] and Tri.[2b], **°पोतोः** Tri.[2a] and Tri.[3], **°पोत** R and T. [4] ii, 3. [5] Thus Tri.; **अपतारो** R and T. [6] Thus Tri.; **वित्सामि** R, **वित्यामि** T. [7] R and T om. this word. [8] R and T om. this Sūtra (Tri. ii, 1, 69). [9] T om. this word. [10] **उअ** Tri.[1], **उव** Tri.[2], Tri.[3], R, and T. [11] **उअह** Tri.[1], **उवह** Tri.[2] and Tri.[3], **इवह** R and T.

Fourteenth Section.

अथ तिङन्तविभक्तयः[1] प्रदर्श्यन्ते ॥

हसे हसने । षह मर्षणे । वर्तमाने लट्[2] । हस् ति । सह् ते । इति स्थिते ।

लटस्तिप्राविजेच्[3] ॥ १ ॥ Hē. iii, 139.

लडादेशौ तिप् त इत्येतौ प्रत्येकमिच् एच् इति भवतः । चकारौ ङरचितीति[4] विशेषणार्थौ । इजादीनां प्रत्येकं तिबाद्यादेशत्वादच धातूनां परस्मैपदित्वादिति विशेषाभावः । हलोऽगित्यगागमः[5] । वा लङ्लोडित्येत्त्वम्[6] । अपद इति[7] निषेधाद्यादेशगुणवृद्धयो[8] न भवन्ति । हसेइ । हसइ । हसेए । हसए । सहेइ । सहइ । सहेए । सहए । द्वित्वविवक्षायां द्विवचनस्य बहुवचनमिति[9] झिझौ भवतः ।

झिझौ न्तिन्तेइरे ॥ २ ॥ Hē. iii, 142.

लडादेशौ झिझौ[10] । तयोः[11] न्ति न्ते इरे इति त्रयो भवन्ति । हसंति । हसंते । हसेइरे । हसंति । हसंते । हसइरे । सहंति । सहंते । सहेइरे । सहंति । सहंते । सहइरे । इरादेशे एत्त्वपक्षे लोप इत्येकारलोपे[12] । हसिरे । सहिरे । इति रूपमित्यन्ये ।

सिप्थास्सेसि[13] ॥ ३ ॥ Hē. iii, 140.

लडादेशौ सिप्थासौ प्रत्येकं से सि इति भवतः । हससे । हससे । हससि । हससि । सहसे । सहसे । सहसि । सहसि ।

थध्वमित्थाहचौ ॥ ४ ॥ Hē. iii, 143.

लडादेशौ थध्वमौ प्रत्येकमित्था हच् इति[14] भवतः । हचि चकार इहहचोर्हस्वेति[15] विशेषणार्थः । वा लङ्लोडित्येत्त्वे[16] लोप इत्येकारलोपः[17] । हसित्था । सहित्था । एत्त्वाभावपक्षे बहुलाधिकारादेकपदेऽपि[18] गुणे[19] संयोग इति[20] स्वरूपेण ह्रस्वे च । हसेत्था । सहेत्था । हादेशे । हसेह । हसह । सहेह । सहह ।

---

[1] तिङ्विभक्तयः R. [2] Pā. iii, 2, 123. [3] °विचेचि Tri.[1], °विचेच् Tri.[2] [4] xiv, 13; ङ्चितीति T. [5] xii, 90. [6] xii, 91. [7] iii, 2. [8] Pā. vi, 1, 78, 87, and 88. [9] iv, 8. [10] Pā. iii, 4, 78. [11] R om. this word. [12] iii, 7. [13] °सी Tri.[1] and Tri.[2] [14] T om. इति. [15] xviii, 10. [16] xii, 91. [17] iii, 7. [18] बाङ्गलकाधि° T; iii, 1 and 2. [19] Pā. vi, 1, 87. [20] iv, 25.

Hē. iii, 141. **मि मिबिटौ**[1] ॥ ५ ॥

लडादेशौ मिबिटौ मि इति भवतः ।

Hē. iii, 154. **तु मौ** ॥ ६ ॥

अदन्ताद्धातोर्मौ परे आत्तु[2] भवति । हसामि । पचे एत्त्वेन[3] । हसेमि । उभयाभावपचे । हसमि । एवं सहामि । सहेमि । सहमि ।

Hē. iii, 144. **मोममु मस्महिङ्**[4] ॥ ७ ॥

लडादेशौ मस्महिङौ मो म मु इति त्रयो भवन्ति ।

Hē. iii, 155. **मोममुष्विच्च** ॥ ८ ॥

अकारान्ताद्धातोर्मोममुषु परेषु अत इत्त्वं चकारादात्त्वं च तु[2] भवति । हसिमो । हसिम । हसिमु । हसामो । हसाम । हसामु । उभयाभावे एत्त्वे[3] । हसेमो । हसेम । हसेमु । सर्वाभावपचे[5] । हसमो । हसम । हसमु । एवं सहिमो । सहिम । सहिमु । सहामो । सहाम । सहामु । सहेमो । सहेम । सहेमु । सहमो । सहम । सहमु ॥

भू सत्तायाम् ।

Hē. iv, 60. **होहुवहवा भुवस्तु** ॥ ९ ॥

भवतेर्धातोः हो हुव हव इति त्रय आदेशास्तु[2] भवन्ति । होइ । हुवइ । हवइ ।

Hē. iv, 238. **अचोऽचाम्** ॥ १० ॥

धातुष्वचां स्थाने अचो बहवो भवन्ति । हिवइ । शेषं हसिवत् ।

Hē. iv, 240. **त्वनतः** ॥ ११ ॥

अकारान्तवर्जितस्याजन्तस्य धातोरगागमस्तु[2] भवति । तिप्सिपोः इजादिषु चतुर्ष्वपि[6] प्राप्तेषु[7] ।

---

[1] मिर्मिबिटौ Tri.[3] [2] ii, 3. [3] xii, 91. [4] °हिङ् Tri., °हिङौ R and T. [5] सर्वाभावे R. [6] इजादिष्वपि चतुर्षु T. [7] xiv, 1 and 3.

अत एवैच्से ॥ १२ ॥ Hē. iii, 145.

इति तिप्सिपोरादेशौ एच् से[1] इत्येतावकारान्तादेव भवतो नान्यस्मादिति नियमात् एच् से इत्येतौ न भवतः । वा लड्लोडित्येत्त्वम्[2] । होएइ । होएए । होअइ । होअए । होइ । होएसे । होअसे । होएसि । होअसि । होसि । भ्वादी[3] ।

हुरचिति[4] ॥ १३ ॥ Hē. iv, 61.

चिद्वर्जिते प्रत्यये परे भुवो ङ इत्यादेशस्तु[5] भवति। त्वनत इत्यागमे[6]। ङएंति । ङअंति । पचे। ङंति । ङादेशाभावपचे । होएंति । होअंति । होंति । ङएंते । ङअंते[7] । ङंते । होएंते । होअंते । होंते । ङएइरे । ङअइरे । ङइरे । होएइरे । होअइरे । होइरे । अत एवैच्से इति[8] नियमात से न भवति । ङएसे । ङअसे । ङएसि[9] । ङअसि । ङसि । ङएइत्था । ङअइत्था । होएइत्था । होअइत्था । होइत्था । हचि[10] चित्त्वेन ङादेशाभावः[11] । होएह । होअह । होह । ङआमि । ङएमि । ङअमि । ङमि । होआमि । होएमि । होअमि । होमि । ङइमो । ङइम । ङइमु । ङआमो । ङआम । ङआमु । ङएमो । ङएम । ङएमु । होइमो । होइम । होइमु । होआमो । होआम । होआमु । होएमो । होएम । होएमु । होअमो । होअम । होअमु । ङमो । ङम । ङमु । होमो । होम । होमु । आदेशानामभावपचे । भू इ । इति स्थिते ।

उवर्णस्यावः ॥ १४ ॥ Hē. iv, 233.

धातोरन्त्यस्योवर्णस्य अव इत्यादेशो भवति । भवइ । शेषं हसिवत् । ङादेशे[11] तु विधानसामर्थ्यादवादेशाभावः । अवादेशे क्रियमाणे हवादेशेनैव[12] सिद्धत्वात् व्यर्थं स्यात् ॥

पुनरपि हसादिषु लक्ष्येव विशेषः प्रदर्श्यते ।

---

[1] xiv, 1 and 3. [2] xii, 91. [3] भ्वादी T; xiv, 2. [4] ङरचिति Tri.[2] and Tri.[3], ङरचि Tri.[1], ङचिति R and T. [5] ii, 2. [6] xiv, 11. [7] R om. this word. [8] xiv, 12. [9] R om. this word. [10] xiv, 4. [11] xiv, 13. [12] xiv, 9; ङादेशे॰ R.

Hē. iii, 177.

लङ्लृटोश्च जर्जार्[1] ॥ १५ ॥

लङ्लृटोश्चकारादिध्यादिषु[2] च विहितस्य स्थाने रितौ[3] ज जा इत्येतौ भवतः।

Hē. iii, 159.

ज्जाज्जे[4] ॥ १६ ॥

ज्जा ज्ज इत्येतयोः परतोऽत[5] एत्त्वं भवति। हसेज्ज। हसेज्जा। पुरुषवचेऽप्येते एव रूपे॥

Hē. iii, 178.

मध्ये चाजन्तात् ॥ १७ ॥

अजन्ताद्धातोः प्रकृतिप्रत्ययोर्मध्ये चकारात्प्रत्ययानां च स्थाने रितौ[3] ज जा इत्येतौ भवतो लङ्लृटोर्विध्यादिषु च। होज्जइ। होज्जाइ। इत्यादि। न त्यनत इत्यागमः[6]। ज्जाज्ज इत्येत्त्वम्[7]। होएज्जाइ। होज्ज। होज्जा। होएज्ज। होएज्जा। भ्वादौ[8]। ऊज्जइरे। ऊज्जाइरे[9]। इत्यादि। ऊएज्जइरे। ऊएज्जाइरे। ऊज्ज। ऊज्जा। ऊएज्ज। ऊएज्जा। अन्ये त्वन्येषामपि लकाराणामिमावादेशाविच्छन्ति। होज्ज। भवति भवेत् भवतु अभवत् अभूत् बभूव भूयात् भविता भविष्यति अभविष्यद्वा॥

चिञ् चयने। धूञ् कम्पने।

Hē. iv, 241.

णो ह्रस्व चिजिपूभ्रुधूस्तुहुलूभ्यः[10] ॥ १८ ॥

चि जि पू भ्रु धू स्तु ऊ लू इत्येतेभ्यः परो ण[11] इत्यागमो भवति। तत्संनियोगेन ह्रस्व। दीर्घस्य च ह्रस्वः[12]। चिणइ। अचोऽचामित्यचि[13]। चुणइ। धुणइ[14]। बहुलाधिकारात्क्वचिद्विकल्पः[15]। तत्र।

Hē. iv, 237.

योरेङ् ॥ १९ ॥

इस्व उस्व युः। तस्य धातोरिवर्णोवर्णयोरेदोतौ यथासंख्यं भवतः।

---

[1] जर्जारी Tri.[3] [2] Pā. iii, 3, 161. [3] iv, 19. [4] ज्जाज्जे Tri., ज्जाज्जो: R and T. [5] T om. ऽत. [6] xiv, 11. [7] xiv, 16. [8] xiv, 2. [9] ऊज्जरेइ। ऊज्जारेइ R and T. [10] T om. this compound. [11] ण Tri., णो R and T. [12] दीर्घस्य ह्रस्वस्य R. [13] xiv, 10. [14] T om. this word. [15] iii, 1.

उच्चिणइ । उच्चेअइ । उच्चेइ[1] । इत्यादि । अस्योवर्णस्याव इत्यस्य[2] प्रयोगवशात् व्यवस्था द्रष्टव्या । शेषं पूर्ववत् ॥

डुकृञ् करणे ।

कृञः कुणः ॥ २० ॥ Hē. iv, 65.

कृञः कुण इति तु[3] भवति । कुणइ । हसिवत्प्रक्रिया । पक्षे ।

अर उः ॥ २१ ॥ Hē. iv, 234.

धातोरन्त्यस्य ऋवर्णस्य अर इति भवति । करइ ॥

वृष सेचने । कृष आकर्षणे । मृष तितिक्षायाम् । हृष तुष्टौ ।

अरि वृषाम् ॥ २२ ॥ Hē. iv, 235.

वृषप्रकाराणां धातूनामृवर्णस्य अरि इत्यादेशो भवति । शोस्सल्[4] । हलोऽक्[5] । वरिसइ । करिसइ । मरिसइ । हरिसइ ॥

रुष रोषे । शुष शोषणे । पुष पुष्टौ । दुष वैकृत्ये । तुष प्रीतौ ।

रुषगेऽचो[6] दिः ॥ २३ ॥ Hē. iv, 236.

रुषादिषु धातुष्वचो दीर्घो भवति । रूसइ । सूसइ । पूसइ । दूसइ । तूसइ ॥

शक्लृ शक्तौ । षच सेचने । त्रुट छेदने । कुप कोपे । णश्च अदर्शने ।

शकगे ॥ २४ ॥ Hē. iv, 230.

शकादिष्वन्त्यस्य द्वे रूपे भवतः । सक्कइ । सक्कइ । तुट्टइ । कुप्पइ । णस्सइ । अचोऽचामिति[7] बाङ्लके दीर्घे । णासइ । नासइ वा ॥

अस भुवि । अस् इ । अस् ए । इति स्थिते । अस्तेरिति वर्तमाने ।

तिङन्त्थि ॥ २५ ॥ Hē. iii, 148.

अस्तेस्तिबादिना सह अत्थि इत्यादेशो भवति । तिङ्शब्देन तिबाद्यादेशा इजादयः[8] परिगृह्यन्ते । अत्थि सो । अत्थि ते । अस् सि । अस् से । इति स्थिते ।

---

[1] उच्चेउ R and T. [2] xiv, 14. [3] ii, 3. [4] iv, 29. [5] xii, 90. [6] ऽचो Tri. ; R and T om. it. [7] xiv, 10. [8] xiv, 1.

Hē. iii, 146.

सिना सिल्[1] ॥ २६ ॥

अस्तेः सिना मध्यमपुरुषैकवचनेन सह लित्सि[2] इति भवति। तुमं सि। सेआदेशे तु। अत्थि तुमं। बहुवचने। अत्थि तुम्हे। उत्तमपुरुषे।

Hē. iii, 147.

त्वस्तेर्म्हम्होम्हि[3] ममोमिना[4] ॥ २७ ॥

अस्तेर्म मो मि[5] इत्यादेशैः सह यथासंख्यं म्ह म्हो म्हि इत्यादेशास्तु[6] भवन्ति। अस्मि। म्हि। स्मः। म्ह। म्हो। पचे। अत्थि अहं। अत्थि अम्हे॥

लिङ्लोटोः। विधिनिमन्त्रणामन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् लोट् चेति[7] लिङ्लोटौ।

Hē. iii, 173.

एकस्मिन्नथमादेर्विध्यादिषु दुसुमु ॥ २८ ॥

विध्यादयर्थविहितानां प्रथमादिपुरुषाणामेकत्वे वर्तमानानां प्रत्ययानां स्थाने यथासंख्यं दु सु मु इत्यादेशा भवन्ति। हसउ। लोटि। वा लङ्लोडित्येत्त्वम्[8]। हसेउ। सर्वत्र एत्त्वाभावे लिङ्वद्रूपम्। हसेत् हसतु वेत्यर्थः। मध्यमपुरुषैकत्वे।

Hē. iii, 175.

लुगिज्जहीज्जस्विज्जेऽतः ॥ २९ ॥

अकारात्परस्य[9] सोर्लुक् इज्जहि इज्जसु इज्जे इति त्रय आदेशाश्च तु[6] भवन्ति। हस[10]। बहुलाधिकारादेकपदेऽपि[11] गुणे[12]। हसेज्जहि। हसेज्जसु। हसेज्जे। लोटि एत्त्वे[8]। हसे। हसेइज्जहि। हसेइज्जसु। हसेइज्जे।

Hē. iii, 174.

सोस्तु[13] हि ॥ ३० ॥

सोर्मध्यमपुरुषैकवचनादेशस्य[14] हि इत्यादेशस्तु[6] भवति। हसहि। लोटि। हसेहि। ह्यादेशाभावे। हससु। हसेसु। सर्वत्र हसेः हस वेत्यर्थः। हसमु। लोटि एत्त्वे[8]। हसेमु। अत्र मोममुष्विञ्चेतोत्त्वं[15] न भवति। तत्र साहचर्येण बहुवचनादेशस्य मु इत्यस्य ग्रहणात्। हसेयं हसानि वेत्यर्थः। बहुत्वविवक्षायाम्।

---

[1] **ल्सि** Tri.; R om. the Sūtra. [2] ii, 4. [3] Tri.[1] and Tri.[2] om. **तु**. [4] **मिममोमुना** T. [5] **अस्तेर्मि म मो मु** T. [6] ii, 3. [7] Pā. iii, 3, 161 and 162. [8] xii, 91. [9] **अकारान्तात्परस्य** T. [10] T om. **हस**. [11] iii, 1 and 2. [12] Pā. vi, 1, 87. [13] **सेस्तु** Tri.[1] and Tri.[3] [14] xiv, 28. [15] xiv, 8; **°ञ्चेत्येत्त्वं** R and T.

बहौ[1] न्तुहमो ॥ ३१ ॥ Hē. iii, 176.

विध्याद्यर्थविहितानां बहुत्वे वर्तमानानां प्रथमपुरुषादिप्रत्ययानां स्थाने यथासंख्यं न्तु ह मो इत्यादेशा भवन्ति। हसंतु। हसेंतु[2]। हसन्तु हसेयुर्वा। हसह। हसेह। हसेत हसत वेत्यर्थः। मोममुष्विच्च[3]। हसिमो। हसामो। हसेमो। हसमो। हसेम हसाम वेत्यर्थः। एवं सहउ। सहेउ[4]। होअउ[5]। होउ[6]। इत्यादि। तत्र होआदेशे त्वनत इत्यगागमाभावे[7] अत इति वचनात्[8] लुगादयो न भवन्ति। होहि। होसु। लङ्लृटोश्च जर्जारित्यादेशयोः[9] लिङि।

त्विज्जाल्लिङः ॥ ३२ ॥ Hē. iii, 165.

लिङस्त्वादेशाज्ज इत्यस्मात्पर इकारस्तु[10] प्रयोक्तव्यः। जाज्ज इत्येत्त्वम्[11]। हसेज्जइ। पचे। हसेज्ज। जारादेशे। हसेज्जा। मध्ये चाजन्तादित्यनयोरादेशपचे[12]। होज्ज[13]। मध्यभूते। होज्जउ। जारि। होज्जाउ। होज्जा। लोटि। हसेज्ज। हसेज्जा। होज्जउ। होज्ज। होज्जाउ। होज्जा॥ लृलुटोः।

भविष्यति हिरादिः ॥ 33 ॥ Hē. iii, 166.

भविष्यदर्थविहिते प्रत्यये परे तस्यैवादिः हि इति प्रयोक्तव्यः।

एच्च क्रातुंतव्यभविष्यति ॥ ३४ ॥ Hē. iii, 157.

क्रातुंतव्येषु भविष्यत्कालविहिते[14] च प्रत्यये परे[15] अत एत्त्वं चकारादित्त्वं च भवति। इजादौ हिलुक् च वेति[16] ज्ञापकाल्लटस्त्विप्रावितिं[17] लङ्विषयोक्ता इजादयो लृलुटोर्भवन्ति। हसेहिइ। हसिहिइ।[18] हसेहिए। हसिहिए[19]। हसेहिंति। हसिहिंति। हसेहिंते। हसिहिंते। हसेहिइरे। हसिहिइरे। हसेहिसे। हसिहिसे। हसेहिसि। हसिहिसि। हसेहित्था। हसिहित्था। हसेहिह। हसिहिह। उत्तमपुरुषैकत्वे।

---

[1] **बहौ** Tri., **बहुनां** R and T. [2] R om. this word. [3] xiv, 8. [4] **सहइ। सहेइ** R and T. [5] **होअइ** T. [6] **होइ** T, **हो** R. [7] xiv, 11. [8] xiv, 29. [9] xiv, 15. [10] ii, 3. [11] xiv, 16. [12] xiv, 17. [13] **होज्जा** R and T. [14] **°विहितेषु** R and T. [15] **च प्रत्ययेषु च परेषु** T. [16] xiv, 40. [17] xiv, 1. [18] T adds **हसेहि**. [19] **हसिए** T.

Hē. iii, 169.

सैं[1] ॥ ३५ ॥

धातोः परे भविष्यति काले मेः स्थाने सं इति वा भवति। बाहुलकादादेरपि रेफस्येत्संज्ञा[2]। हसेस्सं। हसिस्सं।

Hē. iii, 167.

हास्सा मिमोमुमे वा ॥ ३६ ॥

भविष्यदर्थे उत्तमपुरुषादेशेषु मि मो म मु इत्येतेषु[3] परेषु तेषामेवादौ हा स्सा इत्येतौ वा प्रयोक्तव्यौ। हसिहामि[4]। हसेहामि। हसिस्सामि। हसेस्सामि। पचे। हसेहिमि। हसिहिमि। वङ्गले।

Hē. iii, 168.

हिस्साहित्था मुमोमस्य ॥ ३७ ॥

भविष्यति मु मो म इत्येतेषां स्थाने हिस्सा हित्था इत्येतौ धातोः परौ वा प्रयोक्तव्यौ। हसेहिस्सा। हसिहिस्सा। हसेहित्था। हसिहित्था। हास्सा मिमोमुमे वेति[5] हास्सादेशयोः। हसेस्सामो। हसिस्सामो। हसेस्सामु। हसिस्सामु। हसेस्साम। हसिस्साम[6]। हसेहाम। हसिहाम। बाहुलकाद्यसिविषये मोग्वोः परतो हा न भवति। हसेहामो। हसेहामु[7]। पचे। हसेहिमो। हसिहिमो। हसेहिमु। हसिहिमु[8]। हसेहिम। हसिहिम[9]। एवं सहेहिइ। सहिहिइ[10]। इत्यादि॥

क्त्रि। अन्त्यस्येति वर्तमाने।

Hē. iv, 214.

आ भूतभविष्यति च कृञः ॥ ३८ ॥

क्त्रोऽन्त्यस्य आ इत्यादेशो भवति भूतभविष्यत्प्रत्यये[11]। चकारात्तुतव्यक्त्रासु च परतः। काइहिइ। अपदेऽपि बाहुलकात्संधौ[12]। काही। करिष्यति कर्ता वेत्यर्थः। उत्तमपुरुषैकत्वे।

---

[1] सम् Tri.[1] and Tri.[2], सरं Tri.[3], रसं T. [2] iv, 19. [3] xiv, 5 and 7. [4] R om. this word. [5] xiv, 36. [6] R om. this word. [7] हाहामो। हाहामु R, हसामो। हसामु T. [8] हसिमु T. [9] R om. these two words. [10] सहिहि R. [11] T om. भवति भूत°. [12] iii, 1 and 2.

कृदो हं[1] ॥ ३९ ॥ Hē. iii, 170.

करोतेर्ददातेश्च भविष्यति विहितस्य मेः स्थाने हं इति वा प्रयोक्तव्यम्[2]। काहं। पचे। काहिमि। इत्यादि ॥

दृशिर् प्रेक्षणे। गम्लृ गतौ।

डच्छ[3] दृशिगम इजादौ हिलुक् च वा ॥ ४० ॥ Hē. iii, 172.

दृशिगमिभ्यां भविष्यदादेशेष्विजादिषु[4] परेषु डिदच्छ[5] इति वा भवति। हेर्लुक् च वा भवति। एच्च क्रातुमित्येकारेकारौ[6]। दच्छेइ। दच्छिइ। दच्छेहिइ। दच्छिहिइ। गच्छेइ। गच्छिइ। गच्छेहिइ। गच्छिहिइ। पच्चे। दरिसिहिइ। इत्यादि।

भिदिविदिच्छिदो डेच्छ ॥ ४१ ॥ Hē. iii, 172.

भिदिविदिच्छिदिभ्यो भविष्यदादेशेष्विजादिषु[7] डिदेच्छ[8] इति वा भवति। हिलुक् च वा। भेच्छेइ[9]। भेच्छिइ। भेच्छेहिइ। भेच्छिहिइ। एवं वेच्छेइ। वेच्छिइ। इत्यादि।

डोच्छ[10] वचिमुचिरुदिश्रुभुजः ॥ ४२ ॥ Hē. iii, 172.

वचिमुचिरुदिश्रुभुजिभ्यो भविष्यदादेशेष्विजादिषु डिदोच्छ[11] भवति। हिलुक् च वा। वोच्छेइ[12]। मोच्छेइ। रोच्छेइ। सोच्छेइ। भोच्छेइ। इत्यादि। सर्वत्रोत्तमपुरुषैकत्वे।

डं मेर्च्छात्ततः[13] ॥ ४३ ॥ Hē. iii, 171.

डच्चडेच्चडोच्चानां यश्चकारस्ततः परस्य मेर्डिदमित्यादेशो[14] वा भवति। दच्चं। गच्चं। भेच्चं। वेच्चं। छेच्चं। मोच्चं। रोच्चं ॥

लृटि त्वविशेषः। लङ्लृटोश्च जर्जार्[15]। हसेज्ज। हसेज्जा। इत्यादि। मध्ये चाजन्तात्[16]। होज्जेहिइ। होज्जिहिइ। होज्ज[17]। होज्जाहिइ। होज्जा। इत्यादि ॥

लृङि।

---

[1] छदो हं Tri., छदोहं R and T. [2] भवति T. [3] डेच्च R. [4] xiv, 1; R and T add च. [5] डिदेच्च R; iv, 7. [6] त्वातु° R and T; xiv, 34. [7] T adds च. [8] iv, 7. [9] भेच्चइ R and T. [10] डोच्चे R. [11] डिदोच्च R; iv, 7. [12] वोच्चेइ etc. R. [13] मेच्चा° T. [14] iv, 7. [15] xiv, 15. [16] xiv, 17. [17] होज्जा T.

Hē. iii, 180.

माणन्तौल् च लृङः ॥ ४४ ॥

लृङो लितौ[1] माणन्तौ[2] चकाराद्रितौ[3] जजौ च भवतः। अत्र लृङः स्थाने[4] माणन्तौ आदेशौ[5]। न तु तदादेशानां तिबादीनां स्थाने। न तु लृङ्मात्रस्य। तेन माणन्तान्तयोः छदन्तत्वात्प्रातिपदिककार्यं स्यात् न स्याच्च जजान्तयोरित्याङः। अत्र च प्रमाणं वक्ष्यलाधिकारसहकृतः[6] प्रयोगः। एत्र क्वातुमित्येकारेकारौ[7]। हसेमाणं। हसिमाणं। हसेंत। हसिंत। ज्जाज्ज इत्येत्त्वम्[8]। हसेज्ज। हसेज्जा। अहसिष्यदित्यर्थः॥

लुङ्लङ्लिट्सु।

Hē. iii, 163.

हल ईअः[9] ॥ ४५ ॥

हलन्ताद्धातोः परस्य भूतार्थस्य लुङादिप्रत्ययस्य ईअ[10] इत्यादेशो भवति। हसीअ[11]। अहासीत अहसत जहास वा। वाक्ष्यलकादडागमाभावो ऽगागमाभावश्च[12]। अत्र विषये सर्वत्रागागमस्यालोप इलोप इत्यत्र। अह पेच्छइ[13] रक्ष्यतणओ। इत्यादिषु भूतार्थेषु वर्तमानार्थप्रयोगात् तद्व्यत्ययश्चेति[14] व्यत्ययवचनेन साधवः॥

डुकृञ् करणे।

Hē. iii, 162.

भूतार्थस्य सीअहीअही[15] ॥ ४६ ॥

भूतार्थस्य लुङादिप्रत्ययस्य स्थाने सीअ हीअ ही इति त्रयो भवन्ति। हल ईअ[16] इति विधानात्स्वरान्तादयं विधिः। आ भूतभविष्यतोत्याकारः[17]। कासीअ। काहीअ। काही। अकार्षीत अकरोत् चकार वा॥

अस भुवि।

Hē. iii, 164.

अहेस्यासी तेनास्तेः ॥ ४७ ॥

अस्तेस्तेन भूतार्थेन प्रत्ययेन सह अहेसि आसिं इति भवतः। अहेसि सो। तुमं। अहं वा। एवम् आसि॥

भावकर्मणोः। वर्भावकर्मणि तु यग्लुक् चेति[18] वर्तमाने।

---

[1] ii, 4. [2] T adds आदेशौ. [3] iv, 19. [4] लृङ्स्थाने T. [5] T om. this word. [6] iii, 1. [7] xiv, 34. [8] xiv, 16. [9] ईअ Tri., ईआ T. [10] ईआ T. [11] हसीआ T. [12] Pā. vi, 4, 71; xii, 90. [13] पेच्छइ T. [14] iv, 64. [15] सीहीअही Tri.[1], सिहिअहि Tri.[2] and Tri.[3] [16] ईआ T; xiv, 45. [17] xiv, 38. [18] xiv, 51.

द्वे गमिगे ॥ ४८ ॥ Hē. iv, 249.

गमादिधातोरन्त्यस्य द्वे रूपे भवतो भावकर्मणि। तत्संनियोगेन यको लुक् च। हस्सइ। हस्सए। पच्चे।

ईअइज्जौ यक् ॥ ४९ ॥ Hē. iii, 160.

ईअ इज्ज इत्येतौ यगापद्यते। हसीअइ। हसीअए। हसिज्जइ। हसिज्जए। पूर्ववद्गागमाभावः[1] ॥

डुकृञ् करणे।

ईर हृकृतृज्जाम्[2] ॥ ५० ॥ Hē. iv, 250.

हृकृतृजृणामन्त्यस्य भावकर्मणि ईर इति तु[3] भवति। तत्संनियोगेन यग्लुक् च। कीरइ। कीरए। पच्चे। अर उः[4]। करीअइ। करीअए ॥

श्रु श्रवणे।

वर्भावकर्मणि तु[5] यग्लुक् च ॥ ५१ ॥ Hē. iv, 242.

भावकर्मणोश्चिजिपूश्रुधूस्तुङ्गलूभ्यः[6] परो रित्[7] वगागमस्तु[8] भवति। यग्लुक् च तत्संनियोगेन। सुव्वइ। सुव्वए। पच्चे णागमे[9]। सुणीअइ। सुणीअए। सुणिज्जइ। सुणिज्जए ॥

लिङ्लोटोः। हस्सउ। हसीअउ। हसिज्जउ। कीरउ। करीअउ। करिज्जउ। लकारत्रयेऽपि जजादेशयोः[10]। हस्सेज्ज[11]। हसीएज्ज। हसिज्जेज्ज। हस्सेज्जा। हसीएज्जा। हसिज्जेज्जा[12]। कीरेज्ज। कीरेज्जा। करीएज्ज[13]। करीएज्जा। करिज्जेज्ज[14]। करिज्जेज्जा। इत्यादि ॥

अथ लिङ्येव विशेषः। त्विज्याल्लिङः[15]। हस्सेज्जइ। हसीएज्जइ। हसिज्जेज्जइ[16]। कीरेज्जइ। करीएज्जइ। करिज्जेज्जइ[17]। इत्यादि। अन्येषु लकारेषु भावकर्मविषयस्याप्रसिद्धत्वात् न प्रपञ्च्यते ॥

---

[1] See the commentary on xiv, 45. [2] °तृज्ञाम् Tri., °तृजृणाम् R and T. [3] ii, 3. [4] इः R and T; xiv, 21. [5] T om. तु. [6] R and T om. ङ; xiv, 18. [7] iv, 19. [8] Pā. i, 1, 46. ii, 3. [9] xiv, 18. [10] xiv, 15. [11] हसेज्ज R and T. [12] हसेज्जा। हसीअज्जा। हसिज्जज्जा R and T. [13] T om. this word. [14] करिज्जज्ज R, करिज्जज्जा T. [15] xiv, 32. [16] हसेज्जइ। हसिएज्जइ। हसिज्जज्जइ R and T. [17] करिज्जज्जइ R and T.

Fifteenth Section.

अथ णिजन्तविभागः ॥

हस् इ । इति स्थिते ।

Hē. iii, 149. **णिजदेदावावे ॥ १ ॥**

अत् एत् आव आवे इति चतुरो णिजाप्नोति । तकारस्तावन्माचदर्शनार्थः ।

Hē. iii, 153. **अदेल्लुक्यात्खोरतः ॥ २ ॥**

अत् एत् लुक्[1] इत्येतेषु णिचः स्थाने विहितेषु आदेरकारस्य आत्त्वं भवति । हासइ[2] । हासेइ । हसावइ । हसावेइ । तावन्माचदर्शनार्थात्तकाराद्याव[3] आवे इति द्वयोरपि ग्रहणात्स[4] त्वात्त्वानि[5] न भवन्ति । हासंति । हासिंति । हसावंति । हसावेंति । हाससि । हासेसि । हसावसि । हसावेसि । हासह । हासेह । हसावह । हसावेह । हासमि । हासेमि । हसावमि । हसावेमि । हासमो । हासम । हासमु । हासेमो । हासेम । हासेमु । हसावमो । हसावम । हसावमु । हसावेमो । हसावेम । हसावेमु । एवमेजादिष्वप्युदाहार्यम्[6] । तथा । साहइ । होअइ[7] । कारइ । हासेज्ज । हासेज्जा । होएज्जइ । होएज्जाइ । होएज्ज । होएज्जा[8] । इत्यादि यथाप्रयोगमुन्नेयम् ॥

भावकर्मणोः ।

Hē. iii, 152. **लुगाविल् भावकर्मक्ते ॥ ३ ॥**

भावकर्मविहिते प्रत्यये क्तप्रत्यये च परे लुकं लितमाविं[9] च णिजाप्नोति । हासीअइ । अदेल्लुकीत्यात्त्वम्[10] । हसावीअइ । हासिज्जइ । हसाविज्जइ । जजादेशयोः[11] । हासिज्जेज्ज । हासिज्जेज्जा । हसाविज्जेज्ज । हसाविज्जेज्जा[12] । इत्यादि ॥

---

[1] T om. लुक्. [2] हासाइ T. [3] °नार्थतकारा° T. [4] xv, 1. [5] त्वात्तं xiv, 6; इत्तं xiv, 8. [6] xiv, 1. [7] होअहि T. [8] हासज्ज । हासज्जा । होअज्जइ । होअज्जाइ । होअज्ज । होअज्जा R and T. [9] ii, 4. [10] xv, 2. [11] xiv, 15. [12] °विज्जज्जा T.

Sixteenth Section.

अथ धात्वादेशाः केचिदुच्यन्ते ॥

रुधो न्धम्भौ ॥ १ ॥ Hē. iv, 218.

रुधेरन्त्यस्य न्ध म्भ इत्येतौ भवतः । रुंधइ । रुंभइ ॥

छिदिभिदो न्दः[1] ॥ २ ॥ Hē. iv, 216.

छिदिभिदोरन्त्यस्य न्द इति भवति । छिंदइ । भिंदइ ॥

वेष्टेः ॥ ३ ॥ Hē. iv, 221.

वेष्ट वेष्टन इत्यस्यान्त्यस्य ढो भवति । कगटडेत्यादिना[2] षलोपः । वेढइ ॥

अन्यस्य हनखनोः ॥ ४ ॥ Hē. iv, 244.

हनखनोरन्त्यस्य भावकर्मणो रित्थकारस्तु[3] भवति । तत्संनियोगेन यग्लुक् च । हम्मइ । हणिज्जइ । खम्मइ । खणिज्जइ । वाऊलकाद्वन्तेः कर्तर्यपि । हम्मइ । हन्तीत्यर्थः ॥

बन्धो न्धः ॥ ५ ॥ Hē. iv, 247.

बन्धेः न्ध इत्यस्य भावकर्मणि रित् झस्तु[3] भवति । यग्लुक् च । बज्झइ । बंधिज्जइ ॥

अर्जेर्विढप्पः ॥ ६ ॥ Hē. iv, 251.

अर्ज आर्जन इत्यस्य भावकर्मणि विढप्प इति तु[4] भवति । यग्लुक् च । विढप्पइ । अज्जिज्जइ ॥

णप्पणज्जौ ज्ञः ॥ ७ ॥ Hē. iv, 252.

जानातेर्भावकर्मणि णप्पणज्जौ तु[4] भवतः । यग्लुक् च । णप्पइ । णज्जइ । पक्षे ।

---

[1] °भिदो न्दः Tri. and R, °भिदोर्न्दः T. [2] iv, 45. [3] iv, 19; ii, 3. [4] ii, 3.

Hē. iv, 7. **जाणमुणौ ज्ञः ॥ ८ ॥**

इति जाणमुणादेशयोः[1] । जाणिज्जइ । मुणिज्जइ । ज्ञाञोरिति[2] णत्वे । णाइज्जइ ॥

Hē. iv, 256. **ग्रहेर्घेप्पः ॥ ९ ॥**

ग्रहेर्भावकर्मणि घेप्प इत्यादेशस्तु[3] भवति । यग्लुक् च । घेप्पइ । गहिज्जइ ॥

Hē. iii, 161. **दीसल् दृशेः ॥ १० ॥**

दृशेर्भावकर्मणि जित्[4] दीस इत्यादेशो भवति । यग्लुक् च । दीसइ ॥

Hē. iv, 49. **रावो रञ्जयतेः ॥ ११ ॥**

रञ्जयतेर्णिजन्तस्य राव इति वा भवति । रावेइ । रंजेइ[5] ॥

Hē. iv, 35. **आसंघस्संभावेः ॥ १२ ॥**

संभावयतेरासंघ इति वा भवति । आसंघइ । संभावेइ ॥

Hē. iv, 47. **वळ[6] आरोपेः[7] ॥ १३ ॥**

आरोपेः[7] वळ इत्यादेशो वा भवति । वळइ । आरोवेइ[8] ॥

Hē. iv, 41. **प्लावेरोब्बाळपब्बाळौ[9] ॥ १४ ॥**

प्लावयतेः ओब्बाळ पब्बाळ इत्यादेशौ वा भवतः । ओब्बाळइ । पब्बाळइ । पावेइ ॥

Hē. iv, 32. **दृशेर्दावदक्खावदंसाः[10] ॥ १५ ॥**

दर्शयतेर्दाव दक्खाव दंस इति चय आदेशा वा भवन्ति । दावइ । दक्खावइ । दंसइ । पचे । दरिसइ ॥

---

[1] °देशौ T. [2] ज्ञाञो° R and T; xii, 16. [3] ii, 3. [4] ii, 4; R places जित् before भवति. [5] रञ्जेइ R and T. [6] बलव Tri.[1] and Tri.[2], वल Tri.[3] [7] आरोपेः Tri., आरापेः R and T. [8] आरावेइ R. [9] °रोब्बालपब्बालौ Tri.[1] and Tri.[2], °रोब्बालपब्बालौ Tri.[3] [10] °दक्खव° Tri.

यापेर्जवः ॥ १६ ॥ Hē. iv, 40.

यापयतेर्जव इत्यादेशो वा भवति । जवइ । जावेइ[1] ॥

स्त्यस्समः खा ॥ १७ ॥ Hē. iv, 15.

संपूर्वस्य स्त्यायतेः खा भवति । संखाअइ । संखाइ ॥

विस्मुः पम्हुसविसरौ[2] ॥ १८ ॥ Hē. iv, 75.

विस्मरतेः पम्हुसविसरौ भवतः । पम्हुसइ । विसरइ । विम्हरइ इति तु प्रमम्मस्मह्यामिति[3] म्हत्वे द्रष्टव्यम् ॥

धो दहः[4] श्रदः ॥ १९ ॥ Hē. iv, 9.

श्रदित्यव्ययात्परस्य धातो दह इति भवति । अश्रदुदोत्यन्त्यलोपाभावः[5] । सद्दहइ ॥

नेस्सदेर्मज्जः ॥ २० ॥ Hē. iv, 123.

निपूर्वस्य सदेर्मज्ज इति भवति । द्विनीत्युप्रवासिष्वित्युक्तम्[6] । णुमज्जइ । नुमज्जइ ॥

पृच्छेः पुच्छः[7] ॥ २१ ॥ Hē. iv, 97.

पृच्छेः पुच्छ इति भवति । पुच्छइ ॥

तुवरजश्रढौ[8] त्वरेः ॥ २२ ॥ Hē. iv, 170.

त्वरतेः तुवर जश्रढ इत्यादेशौ भवतः । तुवरइ । जश्रढइ ।

श्रतिङि तुरः ॥ २३ ॥ Hē. iv, 172.

तिङ्वर्जिते तुरो भवति । तुरिओ ।

शतृतिङि तूरः[9] ॥ २४ ॥ Hē. iv, 171.

शतरि तिङि च त्वरेः तूर इति भवति । तूरंतो । तूरइ ॥

अथ वैकल्पिकाधिकारः ।

---

[1] जावइ R and T. [2] °वीसरौ Tri.[1] and Tri.[2] [3] xii, 44. [4] दह Tri., R, and T. [5] vii, 2. [6] iv, 44. [7] पुच्छ पृच्छेः Tri.[1], पुच्छः पृच्छेः Tri.[2], पुच्छः प्रछः Tri.[3] [8] °जश्रडौ Tri.[3] [9] Tri. places तूरः before शतृ° ; °तिङो: Tri.[3]

Hē. iv, 62. **पृथक्स्पष्टे णिव्वढः**[1] ॥ २५ ॥

पृथग्भूते स्पष्टे च कर्तरि भुवो णिव्वढ इत्यादेशो भवति। णिव्वढइ। पृथक् स्पष्टो वा भवतीत्यर्थः।

Hē. iv, 63. **प्रभौ हुप्पः** ॥ २६ ॥

प्रभुकर्तृकस्य हुप्पो भवति। पहुप्पइ। पहवइ ॥

Hē. iv, 56. **रा वेर्लियः**[2] ॥ २७ ॥

विपूर्वस्य लीङ् श्लेषण इत्यस्य रा इति तु[3] भवति। विराअइ ॥

Hē. iv, 59. **धुवो धूञः** ॥ २८ ॥

धूञो धुव इति तु[4] भवति। धुवइ। धुणइ ॥

Hē. iv, 58. **हणश्शृणोतेः**[5] ॥ २९ ॥

श्रु श्रवण इत्यस्य हण इति तु[3] भवति। हणइ। सुणइ ॥

Hē. iv, 132. **विसूरश्च खिदेः** ॥ ३० ॥

खिद् दैन्य इत्यस्य विसूरश्चकाराज्जूरश्च वा भवति। विसूरइ। जूरइ। खिज्जइ[6] ॥

Hē. iv, 158. **भाराक्रान्ते नमेर्णिसुडः**[7] ॥ ३१ ॥

भाराक्रान्ते कर्तरि नमेर्णिसुडस्तु[8] भवति। णिसुडइ[9]। भाराक्रान्तो नमतीत्यर्थः ॥

Hē. iv, 186. **भषेर्बुक्कः** ॥ ३२ ॥

भषेर्बुक्क इति तु[3] भवति। बुक्कइ। भसइ[10] ॥

---

[1] **निव्वडः** Tri.[1], **णिव्वडः** Tri.[2], **निव्वडः** Tri.[3] [2] **वेल्लीयः** Tri.[1] [3] ii, 3. [4] R places **तु** after **भवति**; ii, 3. [5] **हणश्शृ°** Tri.[1] and Tri.[2], **हण शृ°** Tri.[3], R, and T. [6] T om. this word. [7] **नमेर्णिसुडः** Tri.[1] and Tri.[2], **णमेर्निसुडः** Tri.[3]; T om. the Sūtra. [8] **नमेर्निसुडस्तु** T; ii, 3. [9] **निसुडइ** T. [10] **हसइ** R.

संदिशेऽप्पाहः[1] ॥ ३३ ॥ Hē. iv, 180.

संदिशेरप्पाह इति वा भवति । अप्पाहइ । संदिसइ ॥

विसट्टो दलेः[2] ॥ ३४ ॥ Hē. iv, 176.

दलेर्विसट्ट इत्यादेशो वा भवति । विसट्टइ । दलइ ॥

विकसेः कोआसवोसट्टौ ॥ ३५ ॥ Hē. iv, 195.

विकसतेः कोआस वोसट्ट इत्यादेशौ तु[3] भवतः । कोआसइ । वोसट्टइ । विअसइ ॥

वळग्गचडमारुहेः[4] ॥ ३६ ॥ Hē. iv, 206.

आङ्पूर्वस्य रुहेर्वळग्ग चड इत्यादेशौ वा भवतः । वळग्गइ । चडइ । आरुहइ ॥

Seventeenth Section.

अथ क्तस्तु विशेषः प्रदर्श्यते ॥

क्ते ॥ १ ॥ Hē. iii, 156.

क्तप्रत्यये परे अत इत्त्वं भवति । हसिअं । णमिअं । नमिअं वा ।

हू क्ते ॥ २ ॥ Hē. iv, 64.

क्तप्रत्यये परे भुवो हू इति भवति । हूअं । णिजन्ते[5] तु । लुगाविल्ल भावकर्मक्त इति[6] लुगाविलो । हासिअं । हसाविअं । केचिद्चाप्यात्वमिच्छन्ति । हासाविओ[7] जणो सामळीए ।

गुर्वादिरविर्वा ॥ ३ ॥ Hē. iii, 150.

गुर्वादेर्णिचोऽवि इति वा भवति । सोसविअं । सोसिअं । तोसविअं । तोसिअं ॥

---

[1] संदिशेरप्पाहः T. [2] विसोट्टो दळेः Tri.[1] [3] ii, 3. [4] वलग्ग° Tri.; °चडचड्डा आरुहेः Tri.[1] [5] °न्तेषु T. [6] xv, 3. [7] हसा° T.

हसितव्य । इति स्थिते । हलोऽगित्यगागमः[1] । एच्च क्त्वातुमित्येकारे-कारौ[2] । मनयामिति[3] यकारलोपो द्वित्वं[4] च । हसेअव्वं । हसिअव्वं ॥

Hē. ii, 146.

तुमत्तुआणतूणाः क्त्वः ॥ ४ ॥

क्त्वाप्रत्ययस्य तुम् अत् तुआण तूण इति चत्वारः स्युः । हसेउं । हसिउं । हसेअ । हसिअ । हसेउआणं । हसेउआण । हसिउआणं । हसिउआण । हसेऊणं । हसेऊण । हसिऊणं । हसिऊण । तुमुनि तुमादेशवद्रूपम् ॥

यह उपादाने ।

Hē. iv, 210.

घेत्तुंतव्यक्त्वासु गहिः[5] ॥ ५ ॥

तुंतव्यक्त्वासु परतो गहिर्घेदिति भवति । घेत्तुं । अस्तोरिति[6] निषेधात्प्रायो लुङ्न[7] भवति । घेत्तव्वं । क्त्वा[8] । घेत्तुं । आदादेशे[9] बाहुलकात् घेदादेशो न । तत्र । गहिअ । इत्यादि भवति । घेत्तुआणं । घेत्तुआण । घेत्तूणं । घेत्तूण ॥

Hē. iv, 211, 212.

अन्यस्य वचिमुचिरुदिभुजां डोत् ॥ ६ ॥

वचिमुचिरुदिभुजीनामन्त्यस्य तुंतव्यक्त्वासु परतो डिदोत्[10] भवति । बाहुलकादोदित्यत्र तकारश्लेत्संज्ञा न भवति । वोत्तुं । वोत्तव्वं । वोत्तुआण । वोत्तूण । मोत्तुं । मोत्तव्वं । मोत्तुआण । मोत्तूण । रोत्तुं । रोत्तव्वं । रोत्तुआण । रोत्तूण । भोत्तुं । भोत्तव्वं । भोत्तुआण । भोत्तूण ॥

Hē. iv, 213.

ना दट्ठो[11] दृशः ॥ ७ ॥

दृशेरन्त्यस्य तुंतव्यक्त्वासु परतस्तेषामेव प्रत्ययानामादिना तकारेण सह द्विरुक्तष्टकारो[12] भवति । ऋतोऽदित्यकारः[13] । दट्ठुं । दट्ठव्वं । दट्ठुआण । दट्ठूण ॥

क्त्रि । आ भूतभविष्यतोत्याकारः[14] । काउं । काअव्वं । काउआण । काऊण ॥

इति क्त्वाद्विभागः ॥

इति[15] सकलविद्याविशारदस्य समुद्रबन्धयज्वनः सूनुना
सिंहराजनामधेयेन विरचिते प्राकृतरूपावतारे
प्राकृतभाषायां तिङन्तविभागः समाप्तः ॥

---

[1] xii, 90. [2] xiv, 34. [3] iv, 48. [4] iv, 4. [5] गृहेः Tri.[3] [6] Tri. i, 3, 7. [7] iv, 26. [8] T om. क्त्वा. [9] xvii, 4. [10] iv, 7. [11] ट्ठो T. [12] °ष्टकारो T. [13] iv, 3. [14] xiv, 38. [15] R om. इति.

Eighteenth Section.

अथ शौरसेन्यादिविभागः प्रदर्श्यते ॥
तत्र शौरसेन्यां तावत् । जुत्तं इणं । एव्वं एदं । इति स्थिते ।

अन्यादिदेति मो णः ॥ १ ॥ Hē. iv, 279.

अन्त्यान्नकारात्परो णकारो वा भवति । इदेति । इकारे एकारे च परे । जुत्तमिणं । एव्वमेदं । पक्षे ।

शेषं प्राकृतवत् ॥ २ ॥ Hē. iv, 286.

उक्तादन्यत्कार्यं प्राकृतवदेव भवति । इति प्राकृतवच्चावान्मोऽचि वेति[1] मकारे । जुत्तमिणं । एव्वमेदं । तदभावे । बिन्दुरिति[2] बिन्दी । जुत्तं इणं । एव्वं एदं ॥
आर्यशब्दस्य भेदः ।

र्यो य्यः ॥ ३ ॥ Hē. iv, 266.

र्य इत्यस्य य्य इति वा भवति[3] । शेषं प्राकृतवत्[4] । अय्यो । पक्षे । वर्यय्यां ज इति[5] जत्वम् । अज्जो ।

अतो ङसेर्दुदोश् ॥ ४ ॥ Hē. iv, 276.

अकारात्परस्य ङसेः शितौ[6] दु दो इति भवतः । हिंतो इत्याद्यपवादार्थं[7] वचनम् । अय्यादु । अय्यादो । अज्जादु । अज्जादो । बहुवचने सुंतो इत्यादौ[8] । अय्यासुंतो । अय्येसुंतो । इत्यादि ॥
पितृशब्दस्य भेदः ।

दस्तस्य शौरसेन्यामखोरचोऽस्तोः ॥ ५ ॥ Hē. iv, 260.

शौरसेन्यामखोरचः[9] परस्यास्तोस्तकारस्य[10] दकारो भवति । विधानसामर्थ्यात्प्रायो लुङ्न[11] भवति । पिदरो ॥
कथाशब्दस्य भेदः ।

---

[1] iii, 11. [2] iii, 10. [3] इति भवति वा T. [4] xviii, 2. [5] xii, 24. [6] ii, 5. [7] iv, 21. [8] iv, 27. [9] i, 5. [10] i, 8. [11] iv, 26.

Hē. iv, 267. **थो धः ॥ ६ ॥**

अस्तोरखोरचः[1] परस्य थस्य[2] धो वा[2] भवति । कधा । पचे[3]। कहा ॥
भगवत्शब्दस्य भेदः ।

Hē. iv, 265. **भवताम् ॥ ७ ॥**

भवत्प्रकाराणां सौ परे नकारस्य मो भवति । बिन्दुः[4]। खरस्य बिन्दुमि[5]। भअवं ॥
राजन्शब्दस्य भेदः[6] ।

Hē. iv, 264. **मः ॥ ८ ॥**

आमन्त्र्ये सौ परे नकारस्य मकारो वा भवति । हे राअं । पचे अन्त्यलोपः[7]। भो राअ ॥
कञ्चुकिन्शब्दस्य भेदः ।

Hē. iv, 263. **आत्सौ वामन्त्र्य[8] इनो नः ॥ ९ ॥**

इनो नकारस्यामन्त्र्ये सौ परे आत्त्वं वा भवति । भो कंचुइआ । पचे । डोसुकाविति[9] सुकि । कंचुई । कंचुइ ॥
इदंशब्दे । इहेणं[10] ङ्यमेतोहादेशे ।

Hē. iv, 268. **इहहचोर्हस्य ॥ १० ॥**

इदंशब्दस्य थध्वमित्याहचाविति[11] विहितस्य हच्प्रत्ययस्य च हकारस्य धकारो वा भवति । इध । इह ॥
अथाव्ययानि ॥

Hē. iv, 262. **तावति खोर्वा ॥ ११ ॥**

तावच्छब्दे आदेस्तस्य दो वा भवति । प्राक्तनवच्चावादन्त्यलोपे[12] च एवमेवेति[13] वलोपश्च । ता । दा । दाव । ताव ॥

---

[1] xviii, 5. [2] T om. this word. [3] vi, 4. [4] iii, 10. [5] v, 5. [6] T om. the text and commentary of xviii, 8. [7] vii, 2. [8] आत्सौ वा° Tri.[1], आत्सावा° Tri.[2], आ सावा° Tri.[3], R, and T. [9] iv, 10. [10] इहेण R and T; vii, 14. [11] xiv, 4. [12] xviii, 2; vii, 2. [13] xiii, 5.

इदानीमो ल्दाणिं[1] ॥ १२ ॥ Hē. iv, 277.

इदानीमो लिह्राणिं[2] भवति । दाणिं[3] ॥

तस्मात्तोता[4] ॥ १३ ॥ Hē. iv, 278.

